# निःश्रेयसम्

## संस्कृत-पत्रम्

१

# निःश्रेयसम्

## संस्कृत-पत्रम्

१

संपादकः
प्रसिद्धप्रवचनकार
पू.आ.श्री विजय श्रेयांसप्रभसूरीश्वराणां
चरणसेवाहेवाकः
मुनिः सम्यग्दर्शनविजयः

# निःश्रेयसम्

## संस्कृत-पत्रम्

१

निमित्तम्

जैनशासनज्योतिर्धर पू.आ.श्री

विजय रामचन्द्रसूरीश्वराणां दीक्षाशताब्दी

प्रकाशनम् :

वैक्रमीय २०६९, पोषशुक्लात्रयोदशी

रविवार, दि.२४-१-२०१३

प्रकाशनप्रतिष्ठानम् :

जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्

ए-१, घनश्यामपार्क फ्लेट, १७, आनंदनगर सोसायटी,

त्रिशला फ्लेट के सामने, भट्ठा, पालडी, अहमदाबाद

फोन : (ओ) २६६० ५८६४

# प्रकाशकहृत्प्रकाशः

येषां मनसि वाचि कायेऽपि सदैव सततमनारतं **'निःश्रेयसं'**पदमासीत् तेषां परमगुरुदेवपादानामाचार्यश्रीमद्विजय-**रामचन्द्रसूरीश्वराणां** दीक्षाशताब्दी-अवसरं लब्ध्वा यदेतद् **'निःश्रेयसम्-१'** संस्कृतपत्रं प्रकाशपथमायाति, तेनैव प्रथमं तेषां स्तुत्या मङ्गलं कृत्वा सर्वेषां गीर्वाणगिरा-रसिकाणां प्राचीनार्वाचीनरचना-प्रकाशनप्रवृत्तिरारब्धाऽस्ति, सम्पादकमुनियुगलेन च परिश्रमोऽकारि, तन्नितरामनुमोदनीयमस्ति। संपादकाभ्यां पूज्या विद्वांसश्च निमंत्रिता, लेखकपुङ्गवैः, कविवरैः, संकलन-कारिभिः, संग्राहकैश्च स्वाः स्वाः कृतयः प्रेषिताः। तेनैव एतद् संस्कृतपत्रं भवतां करकमले शोभते।

वयं प्रतिपोषशुक्लत्रयोदश्यां परमगुरुदीक्षास्मृतितिथौ, आषाढकृष्णचतुर्दश्यां परमगुरुपुण्यस्मृतितिथौ च संस्कृत-पत्रस्य प्रकाशनं कर्तुं समीहामहे। देव-गुरुकृपया भवतां साहाय्येन च सफलीभविष्यामः इत्याशास्महे। उदारचरितानां दानवीराणां भृशमनुमोदनां कुर्मः। औदार्यमेवंप्रकारं सर्वेषामस्तु-इति प्रार्थनाऽस्ति।

**-श्रीविजयहीरसूरीश्वरश्रुतज्ञानभवनम्**
**मुख्यसंचालकः दिनेश जैनः**
**अहमदाबाद (गूर्जरदेशः)**
**(पोष सुद-२, २०६९)**

# संपादकीयम्

**सन्तः! सन्तु मयि प्रसन्नमनसः!**

ऐन्द्रैः परिपूजितानां श्रीतीर्थंकरभगवतां वदनकमलतोऽर्थरुपेण निःसृता द्वादशाङ्गी, गणभृत्पुङ्गवैः सूत्रस्वरुपेणाऽर्धमागधीभाषायां ग्रथिता।

सा च परमोपकारिभिः-परार्थप्रवणैः, पूर्वाचार्यमहर्षिभिररस्मत्प्रबोधार्थं निर्युक्ति-भाष्य-चूर्णि-वृत्तिप्रमुखविवरणग्रन्थैः संस्कृत-प्राकृतभाषामाध्यमेन अस्मत-पर्यन्तं प्रापिता, प्राकृतभाषा-संस्कृतभाषयोः सिद्धान्तरहस्यप्रापणाय समानरुपेण सहयोगित्वे न काऽपि शंकाऽस्ति।

तयोः प्राकृतभाषा सरला। संस्कृतभाषा रम्या विद्वज्जनहृदयेश्वरी च। यतः संस्कृतभाषा प्रौढभाषा, संस्कृतभाषा प्रकृष्टा भाषा, संस्कृतभाषा श्रोत्रानंदजननीभाषा, संस्कृतभाषा मेधाविवर्धिनी भाषा, संस्कृतभाषा लोकोपकारकर्त्री भाषा। किं बहुना संस्कृतभाषा समादरणीया। संस्कृता भाषा गीर्वाणभाषाऽर्थात् दैवीभाषा इति विद्वद्भि र्गीयते।

तत एव आबाल्यकालात् संस्कृतभाषा मम मानसाऽऽकर्षणमन्त्ररूपा वर्तते।

संयमजीवनप्रारम्भकाले परोपकारपरायणैः प.पू. श्री **बोधिरत्न-मुनिपुङ्गवैः** (वर्तमानाऽऽचार्यवर्यैः) संस्कृतभाषाज्ञानप्रदानदानेन मम महोपकारः कृतः संस्कृतभाषाऽध्ययनपश्चात् तच्छिष्यरत्नैः तपःप्रष्ठैः पूज्यपाद-**तपोरत्नविजयमुनिवर्यैः** प्रेरणापात्रीकृतोऽहं यथा भवान् एवमेवं संस्कृतपरिपत्रस्य सम्पादनं करोतु। इयं प्रेरणा मम मानसेऽभीष्टतरा संपनीपद्यत। तथाप्यहं गुरुभक्त्यादिकार्येषु व्यग्रत्वात् सफलयितुं नाऽशक्नवम्।

ततः परं पुनः वैक्रमीये २०६५ तमेऽब्दे दिल्हीनगरचातुर्मासमध्ये व्याप्ति-पञ्चकगन्थस्याऽध्यापकवर्यैः **हरेरामत्रिपाठीभिरपि** अस्मिन्नैव कार्ये प्रेरितस्तथाप्यहं एतत्कार्यकरणे समयं नाऽऽप्नवम्। गुरुभक्त्यादि-प्रभृततरकार्यभारवशात्।

पुनः वैक्रमीये २०६८ तमेऽब्दे नवाडीसानगर्यां विहारयात्राक्रमे कारुण्यनीरधि-पूज्यपाद-पंन्यासप्रवर- श्री **वज्रसेनविजय**गणिवराः प्रवचनदक्ष-सूरिप्रवर-श्री **हेमप्रभसूरयो** मिलिताः। तदा श्री **हेमप्रभसूरी**णां शिष्यरत्न-मुनि-**जिनभद्रविजयेन** पुनः पुनः प्रेरणा कृता कार्यार्थम् तेनेदृशो महाभारः स्वीकृतो मया।

मम दीक्षादातृणां परमगुरुदेव-दीक्षायुगप्रवर्त्तक-परमाऽऽराध्यपादाचार्यवर्य श्रीमद्विजय-**रामचन्द्रसूरीश्वराणां**, पट्टावतंसक-स्वाध्यायमूर्त्ति-परमपूज्यश्रीमद्विजय **मुक्तिचन्द्रसूरीश्वराणां**, पट्टप्रभावक-प्रशमरसपयोनिधि-परमपूज्य-श्रीमद्विजय **जयकुञ्जरसूरीश्वराणां**, पट्टप्रभावक-पूर्वभारतकल्याणकभूमितीर्थोद्धारक-परमगुरुदेवाचार्यदेवेश-श्रीमद्विजय-**मुक्तिप्रभसूरीश्वराणां**, पट्टधररत्नभवजल-निधितारक- श्रीमद्विजय**श्रेयांसप्रभसूरीश्वराणां**, दीक्षागुरुणां, कृपावर्षया एतत्कार्यं सफलीभविष्यति-सरलीभविष्यति चेत्यात्मप्रत्ययः।

चन्द्रं दृष्ट्वा जलनिधिः, वर्षां दृष्ट्वा केकी, सूर्यकिरणैः कमलं, तद्वत् एतत्कार्यं प्राप्य मे हृदयं प्रमोदपूरमावहति। एतत्कार्येण संस्कृत-प्राकृतभाषादाढर्यम् सत्स्वाध्यायः, स्व-स्वभावलाभः, नैकग्रन्थपरिशीलनं, मतिपरिकर्मणं, मेधाविवर्धनं, कर्मनिर्जरादि-बहुविधलाभो भविष्यत्येव। एतत्कार्यं बहुतमप्रयत्नसाध्यं ततो मयाऽपि सावधानमनस्कत्वं धारणीयम्।

यथा ज्योतिर्भरेण दीपकः, दिशोदिशं प्रकाशं विस्तारयति तथा देवगुरुकृपासङ्गेन, **मुनिश्रीजिनभद्रविजयानां** सार्धं पुनः पुनः विचारसारं कृत्वा स्वीकृतैतत्कार्यं वेगवद् भविष्यत्येव।

संस्कृतभाषाकुशलैः कविवरै मुनिप्रवर **श्रीप्रशमरतिविजयैः**, संस्कृतभाषा-विशारदैः **श्री अमृतभाई पटेल** इति नाम्ना प्रसिद्धैः पण्डितवरैश्च, उपलब्धानां सर्वासां रचनानामवलोकनं संशोधनञ्च विहितमस्मत्-प्रार्थनया-इति तेषां सौहार्दं विशेषेणानुमोदनीयमस्ति। समयानुरुपः सहयोगः तैरापादित इति तेषां सौहार्दं विशेषेणानुमोदनीयमस्ति। समयानुरुपः सहयोगः तैरापादित इति संपादनं सरलं संवेगं चाऽभवद्। साध्वीवर्याश्री **जयरेखाश्रीणां**-प्रशिष्या साध्वीश्री प्रशमनिधिश्रिया यत्संशोधन-संमार्जनकार्यं कृतं तत्तु कथं विस्मार्यम्।

यथाशक्त्या यथामत्या मयाऽपि आगतानां कृतीनां संपादनकार्यं कृतम्।
एतद्विषयाऽनभिज्ञोऽहं तथापि गुरुदेव-प्रसादपात्रीभूतः,
तेन सहृदयानां विद्वत्सज्जनानां एकैव याचना यत् मम क्षतयः
संशोध्याः, विज्ञप्तव्याश्च । इत्याशासे ।
परार्थवत्सल-निष्कारणकृपानिधि-**श्रेयांसप्रभसूरीश्वराणां**
चरणकमलभ्रमरो।

**मुनिसम्यग्दर्शनविजयः** (पोष सुद-२, २०६९)

# हार्दिक-अनुमोदनम्...

प्रसिद्धप्रवचनकार-
पूज्यपादाचार्यप्रवर-
श्रीमद्विजय-श्रेयांसप्रभसूरीश्वराणा-
मुपकारस्मृत्यर्थम् एकेन गुरुभक्तपरिवारेण
अस्मिन् ग्रन्थे द्रव्यव्ययेन सुकृतसञ्चयः कृतः
तस्य सुकृतानुमोदनं करोति...

**जगद्गुरु पू.आ.श्री विजय**
**हीरसूरीश्वरजी श्रुतज्ञानभवनम्-**
**मुख्यसंचालनगणः**
**अहमदाबादः**

# क्रमनिर्देशः


| विषयः | पृष्ठः |
|---|---|
| •मङ्गलभावनाः | १ |
| •अनुमोदनम् | २ |
| •स्वागतम्-निःश्रेयसम् | ४ |
| •दीक्षाशताब्दी श्लोकाञ्जलिः | ७ |
| **•खण्ड-१ : प्राचीन कृतयः** | **१७** |
| •विविधस्तुतिचतुष्किकाः | १९ |
| •अमरप्रभसूरिविहितावचूरिसमेतम् भक्तामरस्तोत्रम् | २० |
| •श्रीअर्हन्नामसहस्रसमुच्चयः | ६० |
| •महायमकमयीनेमीजिनस्तुतिः | ७७ |
| **•खण्ड-२ : अर्वाचीन कृतयः** | **८२** |
| •श्रीशारदाद्वात्रिंशिका | ८४ |
| •युगादीश्वराष्टकम् | ८८ |
| •सूरिरामचन्द्रप्रवचनांशः | ९० |
| •चारित्रसप्तविंशिका | ९२ |
| •श्रीसूरिमन्त्राऽष्टकम् | ९८ |
| •चतुर्विंशतिजिनस्तुतिः | १०० |
| •वन्दे श्री वीरम् | १०३ |
| •रांतेजतीर्थ सरस्वतीस्तवना | १०४ |
| •सारम् सारम् | १०५ |
| •निःश्रेयसं शब्दाऽनुप्रेक्षणम् | १०६ |
| •श्री सरस्वत्यष्टकम् | १०८ |
| •सरस्वतीस्तुत्यष्टकम् | ११० |
| •चारित्रस्वरूपाष्टकम् | १११ |
| •श्री शान्तिजिनद्वात्रिंशिका | ११२ |
| •स....... कथमुच्यते | ११६ |
| •संस्कृतम् संस्कृते मूलम् | ११८ |
| •सद्गुरुवन्दना | १२० |
| •"श्राद्धदिनकृत्य"-ग्रंथरत्नस्य परिचयपत्रम् | १२१ |
| •अनूदितं स्तवनम् | १२५ |
| •श्रेयस्करी दीक्षा | १२९ |
| •शास्त्रसंरक्षणम् एवं संस्कृतभाषाविकासः | १३० |

# मङ्गल भावनाः

भोः भोः महानुभावाः। श्रृणुत, अस्मदीयपरमगुरुप्रवराः श्री **आत्म-कमल-वीर-दान-प्रेमसूरीश्वर**-सुविनीत-सुविहित-सुविदित-पट्टधरप्रवराः आचार्यदेव श्रीमद्विजय **रामचन्द्रसूरीश्वराः** निःश्रेयसपदस्याऽऽराधकाः, प्रभावकाः रक्षकाश्चेति सहृदयिजन- प्रसिद्धमऽस्त्येव। तेषामेव च दीक्षाशताब्दी-प्रसङ्गं लक्षीकृत्यैष प्रकाशन-प्रयासः इत्यपि नाऽप्रसिद्धमऽस्ति।

वैक्रमीय १९६९ तमे वर्षे पोषशुक्लत्रयोदश्यां श्रीगंधारतीर्थ-सागरतटे **त्रिभुवनकुमारः श्रीदानसूरि**वरशिष्यमुनिश्री **मङ्गलविजय**हस्तेन **श्रीप्रेमविजय-**मुनिपुङ्गवशिष्यत्वेन पारमेश्वरीप्रवज्यामऽङ्गीकृत्य **मुनिश्रीरामविजय**नाम्ना परमख्यातिं प्राप्य आचार्यपदालङ्कृतोऽपि सन् अष्टादशकसमां यावत् आराधना-रक्षा-प्रभावनाभिः जैनशासनभासनभास्करीभूय षडधिक-नवतिवर्षवये एकोनाशीति-वर्षसंयमपर्याय-षट्पञ्चाशत्-वर्षीय-सूरिपदपर्यायधरः परमामुच्च-समाधिदशां प्राप्य देहत्यागं कृतवान्। तत्पश्चादेकविंशतिवर्षान्ते तद्दीक्षाशताब्दीवर्षमाऽऽगात्-विक्रमतः २०६९ वर्षेऽस्मिन् संस्कृतपत्रमेतत् प्रकाशमाऽऽयाति। संपादनं च मुनिश्री**सम्यग्दर्शनविजय-**मुनिश्री**जिनभद्र**विजयौ करिष्यतः।

गच्छस्थविर-परमपूज्याचार्यश्री**विजयललितशेखरसूरि**-गच्छाधिपति-पू.आचार्यश्री**विजयपुण्यपालसूरि**-परमगुरु-आचार्यश्री**विजयमुक्तिप्रभसूरि**वराणां येषां च हृदि दीक्षाशताब्दीस्मृत्यर्थं एतादृक्-सद्भावनासमुद्भूताः ते सौजन्यमूर्ति-पंन्यासप्रवर-श्री**वज्रसेनविजय**गणिवराणां चाऽऽशिर्वादेन "**निःश्रेयसम्**" संस्कृत-पत्रम् प्रकटीभवति। तच्च यावच्चन्द्रार्कं विवादपथमऽनागत्य विद्वद्वराणां चेतांसि रञ्जयत् प्राचीनार्वाचीनहितकरकृतिभिः सत्यमार्गप्रभावनां कुर्वद् राजयतुतमामिति मे मङ्गलभावना।

**मुंबई** पोष सुद-२, २०६९

**सद्गुरुचरणसेवाहेवाकी**

**आचार्यविजयश्रेयांसप्रभसूरिः**

# अनुमोदनम्

नागोरनगरम्।

निजभाद्रपदः, शुक्लाष्टमी,

सं.२०६८

शान्ति-समाधिसम्भृताः प्रशान्तमूर्त्तयः पूज्या वज्रसेनविजयाः, सौहार्दसम्भृताः श्रीमन्तो हेमप्रभसूरयः, भद्रभावभृताश्च जिनभद्रादिमुनयः।

वन्दनाः शाताकामना च ।

भवन्तो 'निःश्रेयसम्' इति नाम्ना संस्कृतसामयिकस्य प्रकाशनं कर्तुं समीहन्त-एतज्ज्ञात्वा भृशं प्रमोदं प्राप्तोऽस्मि।

निःश्रेयससाधनैकोपायभूतधर्म-शास्त्रावबोधकृते, आर्यसंस्कृतिसंवर्धनकृते, भारतीयप्राचीन-ज्ञान-विज्ञान-संशोधन-बोधनकृते च संस्कृतं सर्वथैवापरिहार्यम्। निर्ग्रन्थमार्गसत्कश्रुतसन्दोहदोहनकृते तु संस्कृतं प्राकृतं चोभे परमौपयिके।

भवद्भिश्चिन्तितं षाण्मासिकीपत्रिकायाः प्रकाशनं विज्ञजनमनोमोदाय भवेदेव। अहं नितरां हृष्टः सन्तुष्टश्चास्मि।

भवतां साहसं श्रमण-श्रमणीवर्गे संस्कृत-प्राकृताध्ययने प्रेरकं संशोधन-मानसोत्प्रेरकं नेत्रदीपकं च भवेदिति प्रार्थये।

**- उपाध्यायो भुवनचन्द्रः**

## अन्तःकरणतः अनुमोदनम्

प्रभावकप्रवचनकारा: आचार्य श्रेयांसप्रभसूरीश्वरा:,
सम्यग्ज्ञानभक्तिस्था: सम्यग्दर्शनविजयादिमुनय:,
अनुवन्दना शातापृच्छा !

परमपूज्यगुरुदेवाचार्यश्रीमद्विजयरामचन्द्रसूरीश्वराणां
संयमशताब्दीवर्षे नूतनं षण्णमासिकं
संस्कृतपत्रं प्रकाशितं भवति, तद् अस्यानंदस्य विषयोऽस्ति।

अस्मिन् कार्ये मुनि जिनभद्रविजयं यत्।
सहभागिन् अकुर्वन् भवन्त: तद भवताम् सौहार्दमस्ति।

इदं पत्रम् उत्तरोत्तरं प्रगतिं साधयित्वा षण्णमासिकत:
त्रिमासिकं भूयाद् इति शुभेच्छा।

**- पंन्यास वज्रसेनविजयः**

पोष शुक्ला पंचमी

सं.२०६९

आराधनाधाम-जामनगर

# स्वागतम्-निःश्रेयसम्

संस्कृत-भाषायाः माहात्म्यं गौरवं च को नाम न जानाति? सार्ध-शत-वर्ष-पूर्वं प्राधान्येन संस्कृतभाषायामेव प्रधानो व्यवहार आसीत्, श्रमण-संघस्य। आङ्ग्ल-भाषा-प्रवेशानन्तरं भारत-देशे जैन-सङ्घे च स्फूर्तिरस्या भाषाया म्लानिमुपयातेति दृश्यते।

अद्यतने समये यथा गूर्जरी-हिन्दी-मारवाडी-मराठी-कच्छी-प्रमुखा भाषाः स्वजन्मानुसारं सर्वैः साधुभिरात्मीयतापुरस्सरमुपयुज्यन्ते तथा संस्कृत-भाषा चिरन्तनानां समादरणीया समासीद्। अस्मत्-सङ्घे तु प्राकृत-भाषा महतीं प्रतिष्ठां प्राप्तवतीति निर्विवादम्।

अद्य तावद् विचित्रं चित्रं लक्ष्यते। अद्य प्रवचन-प्रदानस्य युगः स्फारं लब्ध-प्रसर इति-जनसमक्षं लोकभाषया वक्ता यदपि वक्ति तस्य मूल्यं सविशेषं गण्यते। पर्षदि शतानां सहस्राणां वा श्रोतॄणां समूह उपलभ्यते तेनैव हन्त वैदुष्यं समाकलयन्ति जनाः। नास्य कृते संस्कृत-प्राकृत-भाषाज्ञानमत्रमनिवार्यं। लभ्यन्ते भाषान्तराणि, प्रवचन-पुस्तकानि च लोकभाषा-निबद्धानि। ताभ्यामेव सामान्यत उपदेश-दानं संपद्यते। तत्त्वज्ञानं प्राथमिकं किल निश्चितैरनुवादैरव संपाद्यते। को भवति विशेषोपभोगो भागीरथी-यमुनयोरवि संस्कृत-प्राकृत-भाषयोरवरिल-लहरी-चाञ्चल्य-चमत्कृत् चेतना-तन्त्रयोः। सन्तीह सरलभाषानिबद्धा दार्शनिकाऽध्या-त्मिका ग्रन्थाः, दुरुहाश्च लभ्यन्ते व्याकरण-साहित्य-महाकाव्यादि-ग्रन्थाः। एतेषां धारासु निर्लीने मानसे यो हर्षो वाचामगोचरो जागर्ति, तस्यानुभूतिर्येन लब्धा स धन्यः।

आधुनिक-काले या याः समस्याः सङ्घ-समक्षं सन्ति तासु सेयमाद्यपङ्क्तिवर्तिनीति मतमस्माकम्। भाषा जीवति वाचकेन। अनयो भाषयोर्वाचका नाधिका दृश्यन्ते तदेकं चिन्तास्थानम्। सर्जकताया उन्मेषं धारयन्तः प्रतिभावन्तो लेखका अत्यन्तमल्पा लभ्यन्ते तदन्यच्चिन्ता-स्थलम्। नास्ति शून्यावकाशो विकरालः, परन्तु पूर्ण-गौरवं न दृश्यते भाषयोरनयोः।

एतादृशे समये **निःश्रेयसं** संस्कृतपत्रम् काश्चित् प्रशस्यां गतिमादधानं समायातमत्र। मुखपत्र-माध्यमेन नूतन-रचना-समुन्मेष आधुनिक-समयस्य वैशिष्ट्यं नूनम्।

पुस्तकमस्तु ग्रन्थो वा, तत्र लेखक एक एव भवति, मुखपत्रे तु नैका लेखका भवन्तीति महदन्तरम्। मित्रवरैः श्रीमत्-**सम्यग्दर्शनविजयै**-रनेकसद्गुणालङ्कृतैर्वयमाग्रह-पूर्वकमामन्त्रिता पत्र-पत्रिकादिद्वारा किञ्चित् प्रस्तोतुमिति स्नेहवाचा कथयामि यद्-

१-आगामिनि काले प्रत्येकः अङ्कः विषय-विशेषमेकमादृत्य संपाद्यः/एतेन लेखानां लेखकानां कक्षाबलं वर्धते, वाचकानां बोधमात्रा अपि, संपादकानां कार्यमपि दिग्बद्धं भवति।

२- वर्तमानानां ग्रन्थकाराणां पुस्तकानां परिचयो दातव्यः।

३- धारावाहिका कथा समुत्कण्ठासंपादिका प्रयोक्तव्या।

४- आधुनिकानां ग्रन्थसंपादकानां तेषु तेषु ग्रन्थ-पुस्तकेषु प्रस्तावना हृदय-हारिण्यः सन्ति।

यथा पूज्यानां मुनिवराणां श्रीमतां रक्षितविजयानां प्रस्तावना संक्रमकरण-ग्रन्थ-पुरोपवर्तिनी। अन्येषामपि प्रस्तावना-लेखकानां **श्री सागरानन्दसूरीश्वर**-श्री **प्रेमसूरीश्वर-श्रीरामचन्द्रसूरीश्वर-श्रीचतुरविजय-श्रीमुनिचन्द्रविजय-श्रीवैराग्यरति**विजया-दिकानां वाग्वैशद्यं ग्रन्थकृत्-सहोदरमस्तीति विद्वन्मतम्। एवंविधानां लेखकानां लेखानामंशो यदि प्रकाश्यते तदा नवोदितानां लेखकानां प्रेरणा लप्स्यते तुलनया।

५- पुरातनेषु ग्रन्थेषु विशिष्टानि वर्णनानि सन्ति विविधानि। यथा **वसन्त-विलासे** नगर-वर्णनम्, **वैराग्यकल्पलतायां** समुद्रपोत-वर्णनम्, अक्षरशः समुद्र-वहाण-संवाद-संवादकम्, यथा वा **दिग्विजय**-महाकाव्यगतं गङ्गा-वर्णनम्। एतादृशानां भाषाचित्रनिर्वाहकानां श्लोकानां समल्पः संग्रहः प्रत्यङ्कमवश्यम् आदरणीयः।

६-आध्यात्मिकानां गूर्जर-हिन्दी-प्रमुख-भाषासु रचितानां स्तवनानां पदानां च संस्कृतश्लोकानुवादः सावधानतया कारयितव्यः प्रकाशनीयश्चात्र।

७-प्राकृत-भाषार्थं सविशेषम् अतिदृढं किञ्चित् कर्तव्यम्। भगवतां गणधराणामियं भाषा संस्कृतादधिकं सन्मानम् अवाप्नुयादत्र।

अपेक्षाविस्तारमेनं **निःश्रेयसं**-पत्रस्य समक्षमुपस्थापयन्तो वयं जानीमः श्रमण-श्रमणी-सङ्घस्य प्रतिभा-चमत्कारम्। सन्तीमे सरस्वती-कृपामृतपान-

विकस्वरान्त:करणा:। वश्यमेषामक्षरविश्वम्। श्रद्धासन्नद्धात्मभि: पूजिता, तैर्गुरव:। पूर्वाश्रमाभ्यस्त-नवनवविद्याशाखा अमी श्रामण्येऽपि गीतार्थ-भगवच्चरणेष्वभ्यस्त-समस्ताचारपरम्परा:। सर्वैरेव निजशक्तिरत्र प्रयोज्येति निवेदनम्।

महा-महिमावता-मनवद्य-विद्या-वदात-वचनाना-मनिर्वचनीय करुणा-वाहि-हृदयाना-मनुपमेय-पुण्यपवित्रचरित्राणा-माचार्यधुरन्धराणां तपागच्छनायकानां परमपूज्यानां गुरुदेवानां **श्रीमद्विजयरामचन्द्रसूरीश्वराणां** दीक्षाशताब्दीवर्षे तन्निमित्तमेव प्रकाश्यते **नि:श्रेयसं** पूज्यानां पंन्यास-प्रवराणां श्रीमतां **वज्रसेनविजयानां** मधुमधुरवचसां प्रेरणया, श्रीमतां **सम्यग्दर्शनविजया**नां विदुषां मुनिवराणां संपादनेन च समर्थितमीति समुद्घोष: सात्विकानन्दस्य समुल्लसति सर्वत्र।

**नि:श्रेयसं** सकलसद्गुणसन्निधानं, **नि:श्रेयसं** सहृदयादृतमात्मनीनम् ।
**नि:श्रेयसं** विशदबोधवतामभीष्टं, **नि:श्रेयसं** निबिडदोषविघातसज्जम् ।।१।।
व०ति०।

**नि:श्रेयसं** गुरुजनादरसन्निबद्धं, **नि:श्रेयसं** समयसंकलनानुकूलम् ।
**नि:श्रेयसं** त्रिजगदीश्वरवागुपज्ञं, **नि:श्रेयसं** विविधचिन्तन-सावधानम् ।।२।।

**नि:श्रेयसं** भगवदुच्चरणैकनिष्ठं, **नि:श्रेयसं** रसवदर्थसमृद्धवाक्यम् ।
**नि:श्रेयसं** नवतरै रचनैर्विशिष्टं, **नि:श्रेयसं** सुविहितै: कविभि: प्रशस्यम् ।।३।।

**नि:श्रेयसं** प्रभवतु व्रतिवृन्दवन्द्यं, **नि:श्रेयसं** प्रथयतु क्षतिहीनमार्गम् ।
**नि:श्रेयसं** प्रचरतु स्थलकालशृङ्गे, **नि:श्रेयसं** प्रकटयतु प्रतिबोधमिष्टम् ।।४।।

**-देवर्धि:**

मृगशीर्ष मासे, कृष्णपक्षे अष्टम्यां, श्रीपार्श्वनाथ विद्यापीठे, वाराणस्याम्

आ.श्रीविजयश्रेयांसप्रभसूरयः

# दीक्षाशताब्दी-श्लोकाञ्जलिः-१

**निःश्रेयस**पदध्याता, धर्मधुरैकधूर्वहः।
मैत्र्यादिभावितो जीयात्, स सूरिः परमो गुरुः ॥१॥

त्रिगुप्तं पञ्चसमितं, योगीशं योगस्वामिनम्।
निनंसवः सुराः यं तं, नित्यं सेवे परं गुरुम् ॥२॥

येन शिष्याऽवतंसेन, गुरवो गौरवाऽन्विताः
गारवत्रिकमुक्तेन, तेनैषा भूः पवित्रिताः ॥३॥

यस्मै स्वकीयसर्वस्वं, समर्पितं बुधै र्मुदा।
तस्मै शासननाथाय, किं समर्प्यं मयाऽधुना ॥४॥

रवेस्तमस् तथा दोषाः, यस्मान्नष्टा मूलंकषाः ।
हिमाद्रेः स्वर्धुनीवच्च, गुणसृष्टिः सदाऽऽवहा ॥५॥

आत्मारामममयं भूयात्, यन्नामस्मरणान्मनः।
यस्यांह्रिरमणं नित्यं, योगविदोऽपि लिप्सवः ॥६॥

यस्मिन् सिद्धान्तकौशल्याऽऽधारे श्रद्धालवोऽखिलाः।
गीतार्थाः सूरयस्तस्मिन्, श्रद्धा मेऽस्तु सदाऽनघा ॥७॥

**रामचन्द्र**गणेशान!, **निःश्रेयस**पदार्थिभिः ।
भक्त्या दीक्षाशताब्द्यां त्वं, प्रार्थ्यसे मुक्तिशं सदा ॥८॥

मुनिश्री मोक्षरतिविजयाः

# दीक्षाशताब्दी-श्लोकाञ्जलिः-२

(दरिशन द्यो घनश्याम! नाथ....इति रागेण गीयते)

सूरीन्द्रं श्रय रामचन्द्रगुरु-मनुपमज्ञानम् रे.
सुगुणसमृद्धं बहुश्रुतवृद्धं वरश्रद्धानम् रे.

गुरुविनये श्रीगौतममन्यम्,
गुरुकरुणामृत-धाराधन्यम्;
मुनिमूर्धन्यं, सूरिशरण्यं, भवजलयानम् रे...सूरीन्द्रं...

श्रीजिनवाणीभावितहृदयम्,
निर्वाणश्री-गाढप्रणयम्;
धर्मप्रचारे, रक्षावसरे, सदा युवानम् रे...सूरीन्द्रं...

द्राक्षारसजिद्-वाङ्माधुर्यम्,
वाचस्पतिजिद्-मतिचातुर्यम्;
शासनसूर्यं, शमधनधुर्यं, श्रद्धास्थानम् रे...सूरीन्द्रं...

दुष्कृतहरणं, सुकृतवितरणम्,
मङ्लकरणं, करुणाझरणम्;
जगदाभरणं, पतितोद्धरणं, समताप्राणम् रे...सूरीन्द्रं...

"**दीक्षाशताब्दी**" पुण्य प्रसङ्गे,
आत्मन्! निर्मल-भावतरङ्गे;
व्रज गुरुशरणं, भज गुरुचरणं, कुरु कल्याणम् रे...सूरीन्द्रं...

सा.श्री क्षमानिधिश्री

## दीक्षाशताब्दी-श्लोकाञ्जलिः-३

कम्रं कल्याणमुद्रायां, नम्रं गुर्वनुशासने ।
सत्यनिष्ठापुरीवप्रं, रामचन्द्रं गुरुं स्तुवे ।। १

वैराग्यवाहिनीवाचा, प्रबुद्धा भव्यसंततिः।
यत्पार्श्वे दीक्षिता नैके, रामचन्द्रं गुरुं स्तुवे ।। २

भवनैर्गुण्यध्यातारं, "**श्रेयः**" श्रेणि-प्रसारकं ।
विशुद्धसंयमाधारं, रामचन्द्रं गुरुं स्तुवे ।। ३

पात्रं सम्यग्गुणौघानां, दात्रं दोषद्रुनाशने ।
शास्त्रं स्वान्ते सदा यस्य, रामचन्द्रं गुरुं स्तुवे ।। ४

अरिं दुर्मोहमल्लाय, तरीं भवाब्धितारणे ।
(1) करिं कर्मागनाशाय, रामचन्द्रं गुरुं स्तुवे ।। ५

सम्यग्दर्शनदीपेन, मिथ्यात्वध्वान्तनाशकम् ।
कल्याणकमले मित्रं, रामचन्द्रं गुरुं स्तुवे ।। ६

विघ्नविदारणे वीरं, धीरं धर्मधुराऽऽवहे।
पापतापशमे नीरं, रामचन्द्रं गुरुं स्तुवे ।। ७

अनुदीक्षास्वीकारं यै, र्विश्वे दीक्षा प्रतिष्ठिता ।
"**क्षमा**"रमामुकुन्दं तं, **रामचन्द्रं** गुरुं स्तुवे ।। ८

---

1 गजवाचकः करिः इति इकारान्तः शब्दः दृश्यते, जिनदेव-प्रणीते शिलोञ्छनाममालायाम्-करिः करी (शि.१०९)

# निःश्रेयसम्

संस्कृत-पत्रम्

## खण्ड-१

## प्राचीन कृतयः

पं.अमृत पटेलः

# विविधस्तुतिचतुष्किकाः

नमोवाचं प्रोच्य परमेश्वराय निरन्तराय विघ्नविनाशनाय, परमोपकारिणां परमा-चार्यवर्याणां दीक्षायुगप्रवर्त्तकानां दीक्षाशताब्दीसमुद्यापनमुद्दिश्याऽद्य निरवद्यविद्या वैशद्यकौमुद्यै पार्वणेन्दूयमानानां जिनानां स्तुतिभिः मङ्गलार्थम् । ('विविधस्तुति-चतुष्किकाः' प्रस्तूयन्ते,) एताः स्तुतयः - संस्कृत-प्राकृतगिरा गरिमाणमाप्ताः, प्राचीनतमे १३५३ तमे वैक्रर्माकाब्दे लिखिता राजनगरस्थश्री लालभाइ दलपतभाइ भारतीयविद्यामन्दिरस्य हस्तप्रतसङ्ग्रहे ४३३१० क्रमाङ्कवर्त्तिन्याः प्रतेः मया तत्कालीनसेवावसरे संपादिताः, एनाश्च पठित्वा कण्ठे कृत्वा जिनानाराधयन्तु इति शुभाशया विरम्यते, विदुषां वैदुष्याऽदूष्यमनोनलीनदले इन्दिन्दिरायमाणः

-अमृतः।

## (१) १७० जिनस्तुतिचतुष्कम्

वज्रेन्द्रनील मरकत, कनकाभं क्षिप्तकर्मसङ्घातम् ।
शतमधिकं सप्तत्या, प्रातर्वन्दे जिनेन्द्राणाम् ॥१॥

भरतैरावतभूमौ, महाविदेहेषु वर्तमाना येऽ ।
तीताऽनागतरूपास्ते जिना उषसि सुखदा स्युः ॥२॥

युक्ति-प्रतीति सिद्धं, प्रमाण-नय-निश्चितं जैनैः ।
प्रोक्तं सचराचरभूतहितं, प्रातर्वन्दे श्रुतं सततम् ॥३॥

देवाश्चतुर्निकायाः, सह देवीभिः सदा रताः कृत्ये ।
सङ्घस्य चतुर्वर्णस्य, उषसि सुखं ददतु वो नित्यम् ॥४॥

## (२) वीरजिनस्तुतिचतुष्कम्

नमस् त्रिलोकनाथाय, सर्वसत्त्वोपकारिणे।
संसारार्णवतीर्णाय, महावीराय शान्तये ।।१।। **अनुष्टुप।।**

जिनाविक्षिप्तकर्माणो, भव्याम्बुजदिवाकरा: ।
केवलज्ञानसम्पूर्णा, दिशन्तु परमां गतिम् ।।२।।

नानानयशतै: पूर्णं, नानाहेतूपशोभितम् ।
वाक्यं जिनास्यनि:क्रान्तं, नतोऽस्मि शिरसा हितम् ।।३।।

वरकाञ्चनवर्णाभा, यक्षमातङ्गपूजिता ।
रक्षां करोति सा देवी, कूष्माण्डी जिनशासने ।।४।।

## (३) अर्धपदयमकमयं शान्तिजिनस्तुतिचतुष्कम्

शान्ते! तव स्वान्तमनुक्षुभन्नो, वराङ्गना दानव-मानवानाम् ।
वश्यात्मनो गुप्तिकुटुम्बिनीनां, वराङ्गनादाऽऽनवमानवानाम्।।१।। **उपजाति।।**

प्रीणन्तु ते प्राणिगणं जिनेन्द्रा:, मह्या: समूहेन पुरन्दराणाम् ।
यैर्धाम कैवल्यमितैरमुष्य मह्या:, समूहेन पुरन्दराणाम् ।।२।।

यस्तीर्थराजां वचनामृतानि, सदा नमस्यान्ययश:पदानि ।
धन्य: स वै धुर्यधुरंधराणि, सदा नमस्यान्ययश:पदानि ।।३।।

गी: पातु हस्ताम्बुजमुद्वहन्ती, घनालिकान्तं मकरं दधानम् ।
घ्नन्ती विदां विघ्नमनङ्गमङ्क, घनालिकान्तं मकरन्दधानम्।।४।।

## (४) द्विभाषामयं वीरजिनस्तुतिचतुष्कम्

मथितमदनदर्पं ध्वंसिताज्ञानचक्रम्,
प्रणतसकलशक्रं प्रीणितप्राणिचक्रम् ।
दलितकुनयमाणं सत्तहत्थप्पमाणं,
सुरसयकयमाणं वंदिमो (१)वद्धमाणम् ॥१॥ **मालिनी**

विदितसकललोकान् खण्डिताशेषशोकान्,
सजलजलदघोषान् वर्धितानन्ततोषान् ।
गुणरयणसमुद्दे पत्तनीसेसभद्दे,
पणयसुरनरिंदे वंदिमो तित्थइंदे ॥२॥

प्रणतहतकलङ्कं धौतमिथ्यात्वपङ्कं,
प्रमितिजलविशालं चारु हेतूर्मिमालम् ।
विबुहकयपसंसं नासियासेसदोसं,
पणमह जिणतित्थं भावओ सुपसत्थं ॥३॥

मदमलिनकपोलं प्रावृडम्भोदनीलं,
गजपतिमपि संस्थो याति यः सुव्यवस्थः।
जिनवरभवणेसु सक्कसंपूइएसुं,
दिसउ सुकयरक्खो सुक्खमम्हाण जक्खो ॥४॥

१) ॥ नमः श्रीवर्धमानाय॥

## (५) छन्दोभिधाननिबद्धं वर्धमानजिनस्तुतिचतुष्कम्

वरकनकसुवर्णं श्रीमदम्भोजनेत्रं,
दिनकर-कुलिशाद्यैर्लक्षणैर्लक्षिताङ्गम् ।

सुरगण-नरदेवै **र्मालिनीस्वं** शुभाङ्गं,
व्यपगतमदमोहं नौमि तं वर्धमानम् ।।१।। **(मालिनी)**

परमतविहितोन्यत् कर्ममुक्तोऽन्यदात्मा,
वरविषयविधिज्ञं ज्ञानमन्यत् तदेवं
तदुभयमपि येषां नैव भिन्नं कथञ्चि-
न्निगदितमविकल्पं पान्तु नस्ते जिनेन्द्राः ।।२।।

जयति हि सुविशालं कारणं कारणानां,
सकलभुवनचक्षुर्मङ्गलं मङ्गलानाम् ।
सततमशरणानां देहिनां दुःखितानां,
जगति शरणमेकं वर्धमानस्य तीर्थम् ।।३।।

असितजलदनीलः पद्मपत्रायताक्षः,
पृथुविपुलभुजांशः पीनलम्बोदरोरुः ।
त्रिभुवनमहितानां भाषितं यो जिनानां,
प्रवचनमनुरक्तः पातु सर्वाणयक्षः ।।४।।

नोंध : तृतीयस्तुति सामान्यतः 'श्रुत' विषयक होय छे, अहीं 'तीर्थ' विषयक छे पण 'तीर्थ'नो एक अर्थ 'प्रवचन' पण थाय छे।

## (६) सप्ततीर्थस्तुतिचतुष्कम्

।। वादिगजपञ्चाननपण्डित **वीरचन्द्रेण** रचिताः स्तुतयः ।।

श्री शत्रुञ्जय मोक्षतीर्थ तिलकं श्रीनाभिराजाङ्गजं
नेमिं रैवतदैवतं जिनपतिं चन्द्रप्रभं पत्तने।
तारङ्गेप्यजितं जिनं भृगुपुरे, श्री सुव्रतं स्तम्भने-
श्रीपार्श्वं (१)प्रणमामि सत्यनगरे, श्री वर्धमानं त्रिधा ।।१।।(शार्दूलविक्रीडितम्)

(१) नमः श्री सप्ततीर्थसंस्थितजिनवरेन्द्रेभ्यः ।

वन्देऽनुत्तरकल्पतल्पभवने ग्रैवेयके-व्यन्तर-
ज्योतिष्कामरमन्दराधिवसतीं तीर्थंकरानादरात् ।
जम्बू-पुष्कर-धातकीषु रुचके नन्दीश्वरे कुण्डले
ये चान्येपि (१) जिनाः, नमामि सततं तान् कृत्रिमाकृत्रिमान्।।२।।

श्रीमद्वीरजिनास्यपद्महृदतो निर्गत्य भङ्गोत्तमं
गङ्गावर्त्तनमेत्य योऽभिनदथो मिथ्यात्ववैताढ्यकम् ।
उत्पत्ति-स्थिति-संहृतित्रिपथगा ज्ञानाम्बुधावध्वगा
सा मे कर्ममलं हरत्वविकलं (२) श्रीद्वादशाङ्गी नदी ।।३।।

शक्रश्चन्द्र-रवी ग्रहाश्च धरणः श्री ब्रह्मशान्त्यम्बिका-
दिक्पाला स-कपर्दीका सुरगणाश्चक्रेश्वरी भारती ।
येऽन्ये ज्ञान-तपः-क्रिया-व्रतविधि-श्रीतीर्थयात्रादिषु
श्रीसङ्घस्य तरां चतुर्विधसुरास्ते सन्तु (३) भद्रङ्कराः ।।४।।

नोंध :- आ स्तुति प्रसिद्ध छे परन्तु (१) मोक्षतीर्थ पाठ नवो अने सारो छे। (२) दरेक स्तुतिने अन्ते आवती 'नमस्कार'नी बाबत नवी छे। (३) कर्ता तरीके 'वीरचंद्रगणि'नुं नाम छे। (४) सं.१३५७मां लखायेली आ प्रत छे। माटे कर्ता प्राचीन छे अने पाठो वधु उपादेय छे। **-अमृत**

## (७) चतुर्विंशतिजिनस्तुतिचतुष्कम्

नाभेयाऽजित-संभवाह्व-सुविधि-श्रेयांस-पद्मप्रभा-ऽ
नन्तान् नेमि-सुपार्श्व-शान्ति-विमल-श्रीपार्श्व-चन्द्रप्रभान् ।
भक्त्या सुव्रत-कुन्थु-शीतल-नमि-श्रीवासुपूज्याऽभिधान्,
वन्दे मल्ल्य-भिनन्दनाऽऽख्य-सुमतीन् धर्मा-ऽर-वीरेश्वरान्।।१।। **(शार्दूलविक्रीडितम्)**

चञ्चत्कुण्डल-तारहार-मुकुट-स्रग्-कङ्कणा-ऽलङ्कृतै,
दुग्धाम्बु-प्रभृतोरु-हेमकलशैः स्नाता गिरौ वैबुधे।
(५) सत्त्रिंशत् त्रिदशेश्वरैस् त्रिभुवनप्राज्य प्रतापश्रियस्-
ते वो मुक्तिपदं दिशन्तु, सततं तीर्थाधिपाः शैशवे ।।२।।

(१) नमो जिनेन्द्रेभ्यः। (२) नमः प्रवचनाय । (३) नमः सिद्धेभ्यः । (५) "द्वात्रिंशत्" इति भाति।

यस्याकर्णनमेव भव्यमनसां, दुःखौघनिर्मूलनं
वैराग्यं विदधे त्वलं भवशते स्याद्वादमार्गे वरैः ।
चेतः स्वास्थ्यमहर्निशं प्रकुरुते सङ्घस्य संचिन्तने
तद् वन्दे जिनशासनं नतसुरं मोक्षाध्वसारं परम् ॥३॥

घोराकारकठोरदुःखदलना दुष्टारिपक्षक्षया
क्षेत्रारक्षणदक्षपक्षपटुतैः प्रह्वा (1) प्रिये प्राणिनाम् ।
भव्यानां दुरितौघनाशनिकरैः शान्तात्मनां शान्तता
देवी मानव दुष्टरक्षणपराः क्षेत्राधिपाः पान्तु वः ॥४॥

(1) प्राणिनां प्रिये-अत्र प्रियं कर्तुम्/हेत्वर्थे सप्तमी।

## (८) सर्वजिनस्तुतिचतुष्कम्

पहुं तित्थनाहं जुगोदारबाहुं, महामोहवाहं हणंतं अगाहं ।
समुच्छिन्नकामं सयाहिन्नकामं, परिचत्तवामं नमामि निकामं॥१॥ (भुजंगप्रयातम्)

सक्कमासक्कमाणिज्जमाणिक्कमा, तित्थनाहा महाविक्कमा विक्कमा ।
दिन्नभव्वावलीसंसया संसया, हुंतु सुखाय मे सव्वया सव्वया॥२॥ (स्रग्विणी)

सक्कय मंडलपयंड वियंडजण्णा, ऽणप्पधयारपडलीदलणप्पवीणं।
मायंडमंडलमिव प्पणमामि सालि-सालं जिणागममहं महसा विशालं ॥४॥

आरुढा वरकिंकिणीरणज्झणक्कारप्पहाणप्पहा-
पूरद्दारिय तामसुब्भडमहामाणिक्कमालाउला ।
वायुद्धूयधए विमाणरयणे लल्लक्क चक्काउहा
सा वे सुक्खकरा सुहं दिसतु मे सिद्धाइया देवया ॥४॥ (शा.वि.)

## (९) पार्श्वजिनस्तुतिचतुष्कम्

नमिरनरसुरेसो, नट्ठनीसेसदोसो,
सयलजयपयासो, पूरियासेसआसो।
(१)जणियमणयणासो, सिद्धिबुद्धीण वासो
सयलगुणनिवासो, मे सुहं देउ (२)पासो ॥१॥ **(मालिनी)**

खुडियनिबिडमोहे, निज्जियाणंगजोहे,
विहियविविहबोहे, पत्तसम्मत्तसोहे ।
विमलगुणसणाहे, निज्जियासेसबाहे
विगयविसयदाहे, वंदिमो तित्थनाहे ॥२॥

पयडियपरमत्थं, मोहनिब्भेयसत्थं,
दुहदलणसमत्थं, सव्वभावप्पसत्थं।
नयगहणपसत्थं, हेउ-जुत्तीमहत्थं,
हरउ दुरियसत्थं, तित्थनाहस्स तित्थं ॥३॥

सुर-नरनयपाया, सिद्धिधम्माणुराया,
पणयकयपसाया, सच्छ-ताविच्छ-च्छाया।
परदलियअवाया, धम्मकिच्चे (३)सुहाया,
मम सुहमविसाया देउ नागिंदजाया ॥४॥

---

(१) ''मयण'' इति भाव्यम् ।
(२) नम: श्रीपार्श्वनाथाय ।
(३) ''सहाया'' इति भाति ।

## (१०) नंदीश्वरद्वीपस्तुतिचतुष्कम्

भुवणपयडदीवे तम्मि (१) नंदीसरम्मी,
दहिमुह-रुइयगारा, अंजणा जे गिरिंदा ।
सुर-असुरनयाणं, सासयाणं (२) जिणाणं ।
मणिमयभवणाइं, तेसि बावन्न वंदे ॥१॥ **(मालिनी)**

सिवरमणिविमुक्कऽडक्खीडक्खविलक्खा,
फुरइ परममेसिं किं व कित्ती सुमित्ती ।
इह सुरगिरिसिंगे, मज्झणे खीरपूरे,
सहइ सिरसि जेसिं, ते जिणा दिंतु सुक्खं ॥२॥

परमपयदुवारं, लच्छीए वच्छहारं,
पयडियसिवमग्गं, दत्तसग्गापवग्गं ।
भवजलनिहिसेउं, सुक्खसंपत्तिहेउं,
सयगम-नयभंगं, वंदिमो बारसङ्गं ॥३॥

ससिपहपयडाहिं, देवदित्तच्छडाहिं,
तिमिरमवहरंती मंथरं संचरंती ।
जयइ धवलवन्ना, हंसपत्तं पवन्ना,
सरसिरुहनिसन्ना, सारया सुपसन्ना ॥४॥

---

(1) नमः श्री नंदीश्वराय । (2) नमः सिद्धेभ्यः ।

**सं.मुनिश्री दिव्यदर्शनविजयाः**

# अमरप्रभसूरिविहितावचूरिसमेतम् भक्तामरस्तोत्रम्

पाटण-१ प्रत सं १८८१मां बिमणचंद्रस्वामिजीना शिष्य रामचंद्रस्वामिना लघुभ्राता बिहारी ऋषिअे लखी छे तेना उपरथी संपादन करवामां आव्युं छे.

अमरसूरि विहित वृत्तिनी बाकीनी त्रण प्रतो मळी हती.

२) पाटणथी हेमचंद्राचार्य जैन ज्ञान भंडार जेनो नंबर १७७७६ छे।

३) पाटणथी हेमचंद्राचार्य जैन ज्ञान भंडारनी बीजी प्रतनो नंबर ११४३६ छे।

४) महावीर जैन आराधना केन्द्र कोबा (मु.गांधीनगर) स्थित श्री कैलास सूरि जैन ज्ञानभंडारनी त्रीजी प्रत जेनो नंबर १३५४५ छे.

अमरप्रभसूरिजीअे (१५मी सदी) वाचनाचार्य **देवसुंदर** सद्यतिनी अभ्यर्थनाथी भक्तामर स्तोत्रनी वृत्ति रची छे। आ वृत्तिनी पूर्वे (१) गुणाकरसूरिकृत वृत्ति (सं.१४२६) जेनुं ही. र. कापडीयाअे संपादन कर्युं छे। (२) रामचंद्रसूरि (१४७१)नी अप्रकाशित वृत्ति छे। तेनुं संपादन अमे करी रह्या छीए। ते पछी आ वृत्ति प्राचीन छे। भक्तामर स्तोत्रनी कुल प्रकाशित वृत्तिओ मांथी श्री ही. र. कापडीयाअे ३ वृत्तिओ १) गुणाकरीया २) मेघविजयकृत ३) कनककुशळगणिकृत प्रकाशित करी छे। त्यार बाद ४) मुनि धर्मतिलक विजयजीअे वि.२०५३मां सिद्धिचंद्रगणि कृतवृत्तिनुं पुनः प्रकाशन कर्युं। जे वि. सं.१९४१-४२मां भीमसिंह माणेके प्रथम प्रकाशित करेल छे। त्यारबाद आचार्य श्री विजय शीलचंद्रसूरिजीअे अनुसंधान-५० (ई.स.२००९)मां (५) खंडेल गच्छीय श्री शांतिसूरिविरचित टीका. (६) अज्ञातृकर्तृका अवचूरि, अनुसंधान-५२ (ई.स.२०१०) मां (७) श्रीनयविजयगणिकृत अवचूरि प्रकाशित करेल छे। आम ८ वृतिओ पछी आ ९मी अमरप्रभसूरिजीनी वृत्ति प्रकाशित थाय छे। संपादन दरमियान केटलाक मुद्दा जे यथाक्षयोपशम नजरे आव्या छे तेनो उल्लेख करुं छुं।

(१) बधे श्रीसूर्य शब्द वापर्यो छे। स्तोत्रनी उत्पत्तिनी कथा गुणाकरसूरिनी समानप्रायः छे। परंतु तेमां मानतुंगसूरिजीनां नगर प्रवेश प्रसंगे घी नो भरेलो वर्तुलाकार वाटको ब्राह्मणो मोकले छे। आचार्यश्री तेमां सळी भरावीने पाछो मोकले छे। जे एवुं सूचित करे छे। घी भरेला वाटका मां सळी समाई गई तेम अमे पण तमाराथी भरेला नगरमां समाई जईशुं। (२) पूर्व प्रकाशित आठ वृत्तिओमांथी केवल बे वृत्तिओ गुणाकरसूरिकृत अने बीजी पं.श्री चंद्रविजयजी संपादित अवचूरिमां स्तोत्र उत्पत्ति प्रबंध छे। पण घीना वाटकावाळो प्रसंग नथी। आवो ज प्रसंग गुजरातमां पारसीओ आव्या ते अवसरे पण बन्यो हतो। तथा ब्राह्मणो साथे आचार्यश्रीअे वाद कर्यो अने तेमां जगत्कर्तृत्व मतने हरावी जीवदया मतनी स्थापना करीने विजयी थया।

आ बे प्रसंगो अमरप्रभसूरिजीए रजू कर्या छे। एना मूळनी गवेषणा करवी घटे। भक्तामरस्तोत्रनी वृत्तिमां केटलाक शब्दोनुं अर्थघटन ध्यानपात्र छे। पद्य-४ तथा ३८-३९मां 'उद्धत' पाठ प्रसिद्ध छे। अमर मां मूळ पाठ अने टीका पाठमां 'उद्धुत' शब्द छे। पद्य-७ मां भगवानना दर्शनथी जेओनो पाप अंधकार नाश न थाय ते 'अभव्य' एवो 'अभव्य' नो दर्शनलक्षी अर्थ अपायो छे।

पद्य-१० भुवनभूषण! अने भूतनाथ! एवा बे स्वतंत्र विशेषणो छे।

पद्य-११ भवन्तमभिष्टुवन्तः भवतः तुल्या भवन्ति-आ पद्यांशनां अर्थघटनमां ''वीतरागं ध्यायन् वीतरागो भवेत्'' जणावे छे ते माटे ईलिका-भ्रमर न्याय दर्शावायो छे।

पद्य-२७ मां ''उपात्तविबुधाश्रय'' पद छे तेनुं विवरण पण ''विबुध'' पदथी ज कर्युं छे।

पद्य-३७ जेना हृदयमां तारा नाम रुपी नागमनी छे, ते मनुष्य पुष्पमालानी जेम सर्पने पकडे छे। क्रमयुगेन नो अर्थ 'वीतरागचरणयुगेन' कर्यो छे. बीजी वृत्तिओमां 'पोतानुं चरणयुगल' अर्थ छे।

पद्य-३९ मूळमां तरुणातुर पाठ छे परंतु अवचूरिमां तरणातुर पाठ छे।

पद्य-४२ मूळमां 'निगड' शब्द नो पर्याय अपायो छे अने विवरणमां 'प्रौढलोहमयदण्डिका' स्पष्टता कराई छे।

मेघविजयजीमां० 'अंदुक' अर्थ आप्यो छे। अभि० चिंता० श्लो.१२२९मां ''हाथीने पगे बांधवानी सांकळ'' पादपाश अर्थमां निगड, शृंखला अने अंदुक शब्दो अपाया छे। गुणाकरीय वृत्तिमां 'अष्टीला' शब्द छे। श्रीयुत् ही.र.कापडीयाजीए पोताना संपादनमां टीप्पणमां 'दृषद्विशेषः', अर्थ आप्यो छे ते चिंत्य छे। भगवद्गोमंडलमां कांकरी अर्थमां 'अष्ठीला' शब्द नोंधायो छे।

हस्तप्रत उपर पाठसंपादननो अमारो प्रथम प्रयत्न छे एटले क्षति रहेवानी संभावना छे माटे विद्वानो क्षतिदर्शन अने संमार्जन निर्देश करशे एवी अपेक्षा अमारा जेवा संपादननी केडीनां नूतन पथिकोने रहे ते स्वाभाविक छे।

**-संपादकः**

॥ अमरप्रभसूरिविहितावचूरिसमेतम् ॥

॥ भक्तामरस्तोत्रम् ॥

नत्वा वृषोपदेष्टारं **वृषभध्वजं** सत्तमं।

आत्मस्मरणे टीकां, कुर्वे **भक्तामर**स्तवे ॥१॥

पूर्वमस्य स्तोत्रस्योत्पत्तिर्लिख्यते, तथाहि - पुरा श्री**माल**देशे '**उज्जयिन्यां** नगर्यां, श्री**वृद्धभोज**राजा राज्यं करोति, तस्य च सभायां **मयूरबाण**प्रमुखाः पञ्चशतानि पण्डिताः सन्ति, ते च चतुर्दशविद्याप्रवीणाः, **न्यायवेदान्त-मीमांसा-साङ्ख्य-वैशेषिक-पातञ्जला**दिषट्शास्त्राध्येतारो, देवतालब्धवरा, गर्वोत्कराः। एकदा **मयूर**पण्डितेन स्वपुत्र्या एव शृङ्गारवर्णना कृता **मयूरा**ऽष्टकेन, ततः कुष्ठी जातः, पश्चात् स काव्यशतेन श्रीसूर्यं तुष्टाव, ततः प्रसन्नेन श्रीसूर्येण प्रत्यक्षीभूय, तस्य कुष्ठं निर्गमितम्। तदा तस्य लोके महिम(मा) बभूव, तदा **बाण**स्तस्य महिमानमसहमानः स्वस्य हस्तौ पादौ छेदयित्वा चतुरङ्गो जातः, काव्यशतेन **चण्डीं** तुष्टाव, ततः प्रसन्नेन मनसा स्वयमेव **चण्डिका** प्रत्यक्षीभूय संतुष्टा सती, तस्य हस्त-पादान् पुनर्नवान् चकार, तस्याऽपि महती पूजा प्रवृत्ता।

एवं तयोर्महीयांसं महिमानमालोक्य शिवशासनस्य प्रशंसां कुर्वाणा जना जिन-शासनस्य हीलांचक्रुः-'जिनशासने सर्वेऽपि क्रियाकष्टेनैव स्वोदरपूरकाः सन्ति, परमेतादृशो विद्यावान् कविश्च शक्तियुक्तः, प्रत्यक्षीकृतदेवप्रभावक (०देवः प्रभावकः) कोऽपि नास्ति इत्युक्त्वा श्रावकान् हीलयन्ति, एकदा श्री**वृद्धभोज**राज्ञा श्रावकाः पृष्टाः - भवतामप्येतादृशः कोऽपि विद्यावान् न(ना)स्ति ? - तदा श्रावकैर्विचिन्त्योक्तम्,-स्वामिन् ! श्री**मानतुङ्ग**-सूरयः

श्वेताम्बरा अस्मद्गुरवो महाविद्वांसो महाप्रभावकाः सन्ति, तच्छ्रुत्वा राज्ञा ते समाहूताः, समागताश्च[ते] प्रवेशमहः(ह) समये ब्राह्मणैः स्त्यानघृतेन गाढं परिपूर्णं भत्तं [पूर्णभृतं ?] वर्त्तुलकं, [=वाटको] एकस्य करे दत्वा, गोपुरे सन्मुखं दर्शितं, ते(तद्) दृष्ट्वा गुरुभिरेकस्य श्रावकस्य पार्श्वादिकां तृणशलाकां याचित्वा तन्मध्ये निचिक्षिपे। श्रावकैः पृष्टं - 'स्वामिन्! किमिदम्? -

गुरुभिरूचे - 'यथैतद् वर्त्तुलकं स्त्यानघृतेन भृशं भरितमस्ति, तथैतन्नगरमस्माभिः पूरितमस्ति, अत्र भवतामवकाशो न भविष्यति इति ब्राह्मणैः सूचितम्, अस्माभिस्तु - यथैतन्मध्ये शलाकायाः प्रवेशो बभूव, तथा भवतां मध्येऽस्माकं प्रवेशो भविष्यति' इति, श्रावकैश्चिन्तितम्' - अहो कथमवगमत् तेषामाशय(यम्), कथं च संज्ञयैवोत्तरमदात् इति। ततः पौषधशालायां समागताः,

एकदा राजसभायां पञ्चशतानि पण्डिताः मिलिताः तत्र श्री**मानतुङ्ग**सूरयोऽप्याहूताः, पृष्टं च 'अस्ति काचित् कवित्व-वक्तृत्वशक्तिः ?, श्रीसूरिभिरुक्तम् - अस्ति, तदा वादः कर्तुमारब्धः, तत्र श्रीसूरिभिर्जगत्कर्तृत्व-निरासवादेन, जीवदयास्थाप[ने]न, हिंसोत्थापनेन च ते निरुत्तरीकृताः, यः (एवं) श्रीसूरिभिर्जयः प्राप्तः । पुनस्तैरुक्तम्-काचिद्दैवीशक्तिरप्यस्ति ?, गुरुभिरुक्तम्-'भविष्यति', तैरुक्तम्-अस्ति चेत्?, 'तर्हि यथा **मयूरेण सूर्यशतं** कृत्वा निजकुष्ठं निर्गमितम्, यथा च **बाणेन चण्डीशतं** कृत्वा, छिन्नौ स्वहस्तपादौ च नवीनावानायितौ, तथा यूय**मप्यष्टचत्वारिंश** (चतुश्चत्वारिंश) न्निगडैर्बद्धमात्मानं स्वयमेव मोचयिष्यथ, तदा ज्ञास्यते भवतां दैवीशक्तिः, 'एवमस्तु' इत्युक्ते सतालकैरष्टचत्वाशिं (चतुश्चत्वारिंश) न्निगडैर्दृढं बद्ध्वा, अपवरकमध्ये क्षिप्त्वा, द्वारे च दृढं कपाटो दत्तः, सप्त तालकाः जटित्सः(त्वा), चतुर्दिक्षुः

ब्राह्मणा राजपुरुषाश्च प्राहरिकाः स्थिताः।

एवं च कृते श्री**मानतुङ्ग**सूरिभिः श्री**भक्तामर**स्तोत्रं कर्तुमारेभे, एकैकस्मिन् काव्ये क्रियमाणे एकैको निगडस् त्रुटितः, तालका अपि त्रुटिताः, कपाटं च स्वमेवोद्घटितम्, 'तद् दृष्ट्वा प्राहरिकै राज्ञे निवेदितम्, राजाप्यागतः, दृष्ट्वा च विष्टम्भ जातः, गुरून् वन्दित्वा, सवादित्र ध्वान(ध्वनि)-गीत-मान-बहुमान-सन्मानपुरस्सरं शालायां प्रापिता, उक्तं च 'क्षन्तव्यो मेऽपराध' इति, ततो राजा जिनशासनस्य रागी जातः, एवं श्रीजिनशासनस्योन्नतिर्बभूव । इत्थं श्री**बृहद्गच्छाधीशै**र्महाप्रभावकैः श्री**मानतुङ्ग**सुरिभिरिदं स्तोत्रं कृतम् :-

अथाऽस्य च **व्याख्या** प्रारभ्यते, भक्तामरस्या**वचू**रिर्लिख्यते -

**भक्तामरप्रणतमौलिमणिप्रभाणा-**
**मुद्द्योतकं दलितपापतमोवितानम्।**
**सम्यक् प्रणम्य जिनपादयुगं युगादा-**
**वालम्बनं भवजले पततां जनानाम्॥**
**यः संस्तुतः सकलवाङ्मयतत्त्वबोधा-**
**दुद्भूतबुद्धिपटुभिः सुरलोकनाथैः।**
**स्तोत्रैर्जगत्त्रितयचित्तहरैरुदारैः**
**स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम्॥१-२॥** युग्मम्

(१-२) **अमर० अव० किल** इति सत्ये, **अहं** श्रीमानतुङ्गोऽपि, **तं प्रथमं जिनेन्द्रं** श्रीआदिनाथं, **स्तोष्ये** तस्य स्तवनं करिष्यामि । कैः ? **स्तोत्रैः**,

किंविशिष्टैः स्तोत्रैः ?-**जगत्त्रितयचित्तहरैः** त्रिभुवनमनोरञ्जकैः, जगत्त्रितय-चित्तं हरन्ति इति जगत्त्रितय-चित्तहराणि, तैः जगत्त्रितयचित्तहरैः । पुनः किंविशिष्टैः स्तोत्रैः ? - **उदारैः** स्फारै (उत्कटैः)गम्भीरार्थैः । किं कृत्वा ?-**जिनपादयुगं**-[वीतरागपादयुगं]सम्यक् प्रणम्य श्री**आदिदेवस्य** चरणयुगलं नमस्कृत्य । किंविशिष्टं जिनपादयुगं ?-**उद्द्योतकं,** कासां ?-**भक्तामर-प्रणतमौलिमणि-प्रभाणाम्, भक्ता** भक्तिशालिनो ये **अमराः**(देवाः), तेषां **प्रणतमौलयो** नम्रीभूतशिरांसि, तत्र ये **मणयः** [तेषां याः] **प्रभाः** [भक्तामरप्रणत-मौलि]मणिप्रभाः, तासाम्-भक्तामरप्रणतमौलिमणिप्रभाणां, **उद्द्योतकं** प्रकाशकम् । पुनः किंविशिष्टं जिनपादयुगम् ?- **दलितपाप-तमोवितानम्-दलितं** चूर्णितं, **पाप**[मेव]-**तमोवितानं**-पापान्धकारवृन्दं येन तत्-दलितपापतमोवितानम् । पुनः-किंविशिष्टं जिनपादयुगं ?-**युगादौ** युगलधर्मनिवारणादौ, **भवजले** (संसार-समुद्रजले) **पततां जनानां** (पुरुषाणाम्) **आलम्बनम्**-संसारार्णवब्रुडतां लोकानां आधारभूतम् । **यो** युगादिनाथः, **सुरलोकनाथैः** सुरेन्द्रराजभिः, **(संस्तुतः) सम्यक्**प्रकारेण, स्तुतः, किंविशिष्टैः सुरलोक-नाथैः ?-**उद्भूतबुद्धिपटुभिः-उद्भूता** उत्पन्ना या, **बुद्धिः,** तया **पटवश्चतुराः** ये उद्भूत-बुद्धिपटवः, तैः उद्भूतबुद्धिपटुभिः ।

कस्मात् ?-**सकलवाङ्मयतत्त्वबोधात्-सकलं** यत् **वाङ्मयतत्त्वं** सकलशास्त्रतत्त्वं, तस्य **बोधो,** ज्ञानं-सकलवाङ्मयतत्त्वबोधः, तस्मात् सकलवाङ्मयतत्वबोधात् समस्तशब्दशास्त्र-तत्त्वार्थज्ञानात् ॥२॥ काव्य-युग्मस्यार्थः

**बुद्ध्या विनाऽपि विबुधार्चितपादपीठ !**
**स्तोतुं समुद्यतमतिर्विगतत्रपोऽहम् ।**
**बालं विहाय जलसंस्थितमिन्दुबिम्ब-**
**मन्यः क इच्छति जनः सहसा ग्रहीतुम् ? ॥३॥**

**( ३ ) अमर० अव० बुद्ध्या विनाऽपि०**-हे **विबुधार्चितपादपीठ** ! **विबुधा** देवाः, तैः, **अर्चितं** पूजितं, **पादपीठं** पादासनं यस्य सः, विबुधार्चित-पादपीठः, तस्य संबोधनं क्रियते-हे विबुधार्चितपादपीठ ! हे देवपूजित-चरणकमल !, **अहं बुद्ध्या** विनाऽपि प्रज्ञा-(प्रज्ञया) विनाऽपि, **त्वां स्तोतुं** आख्यातुं, **समुद्यतमतिः** वर्तते (वर्त्ते) उद्द्यतबुद्धिसञ्जातः, किंविशिष्टो-ऽहं ?-**विगतत्रपः** निर्लज्जः, विशेषेण गता त्रपा लज्जा यस्मात् स विगतत्रपः-गतलज्जः । कविर्दृष्टान्तमाह-[१]**जलसंस्थितं** जलकुण्ड(पानीय)प्रतिबिम्बवन्तं, **इन्दुबिम्बं** चन्द्रमण्डलं, **सहसा ग्रहीतुं** झटिति ग्रहीतुम् । **बालं विहाय** बालकं परित्यज्य, **अन्यः** जनः, **क**[इच्छेत्] इच्छति ?, अपि तु कोपि न इच्छति, अतः कारणात्-अहं बालकसदृशः । काव्यस्यायमर्थः-जलसंस्थितं चन्द्रबिम्बं बाल एव तत्कालं ग्रहीतुमिच्छति, तथाहं बुद्ध्या विनाऽपि स्तोतुं समुद्यतः, बालोपि विगतत्रपोऽहमपि तथैव, यथा अप्राप्ते चन्द्रबिम्बे बालो लज्जां न लभते तथाऽहमपि ह्रीपदं नो भवामि इति भावः ॥३॥

**वक्तुं गुणान् गुणसमुद्र ! शशाङ्ककान्तान्**
**कस्ते क्षमः सुरगुरुप्रतिमोऽपि बुद्ध्या**
**कल्पान्तकालपवनोद्धुतनक्रचक्रं**
**को वा तरीतुमलमम्बुनिधिंभुजाभ्याम् ? ॥४॥**

१) अत्रान्वयो भिन्नः यथा 'बालकं रिहाय-परितज्य अन्यः कः प्राणी जल०' (पा.२.को.)

**(४) अमर० अव० 'वक्तुं गुणानिति**-हे **गुणसमुद्र** ! गुणानां समुद्रो गुणसमुद्रः, तस्य सम्बोधनं क्रियते-हे गुणसमुद्र ! **युगादिदेव** ! **ते** तव, **गुणान् वक्तुं** कथयितुं, **कः क्षमः** कः समर्थः ?-अपि तु न कोपि समर्थः। [१]किंविशिष्टान् गुणान् ? **शशाङ्ककान्तान्**, शशाङ्कवत् चन्द्रवत्, कान्ता मनोहराः शशाङ्ककान्ताः, तान् शशाङ्कान्तान् चन्द्रवन्निर्मलान् गुणान्। किंविशिष्टः कः प्राणी ? **बुद्ध्या सुरगुरुप्रतिमोऽपि बृहस्पति**सदृशोऽपि तुल्योऽपि। कविर्दृष्टान्तमाह - **वा** संदेस(ह)निराकरणे, **अम्बुनिधिं** समुद्रं, **भुजाभ्यां** भुजदण्डाभ्यां, **कः तरीतुं अलं** समर्थः ? अपि तु न कोऽपि। किंविशिष्टं अम्बुनिधिं?-**कल्पान्तकाल-पवनोद्धुत-नक्रचक्रम्** कल्पान्त-कालपवनेन प्रलयकाल-वायुना, **उद्धुता** उच्छालिता, नक्रचक्रा[२] जलचर-जीवसमूहाः यस्य स-कल्पान्त-कालपवनोद्धुतनक्रचक्रः, तं कल्पान्तकाल-पवनोद्धुत-नक्रचक्रम्॥४॥

**सोऽहं तथापि तव भक्तिवशान्मुनीश !**
**कर्तुं स्तवं विगतशक्तिरपि प्रवृत्तः।**
**प्रीत्याऽऽत्मवीर्यमविचार्य मृगो मृगेन्द्रं**
**नाभ्येति किं निजशिशोः परिपालनार्थम् ?॥५॥**

**(५) अमर० अव० सोहं त०** - हे मुनीश ! मुनीनामीशः स्वामी मुनीशः, तस्य संबोधनं क्रियते-हे मुनीश !। **तथाऽपि सोऽहं भक्तिवशात् तव स्तवं** स्तोत्रं कर्तुं प्रवृत्तः, सोद्यतो(मो) जातः। किंविशिष्टः अहं ?-**विगतशक्तिरपि** विशेषेण

१. अत्रान्वयः कर्तु-कर्मणोः भिन्नः पा०२, को०। २. ०चक्रादिजल० को०।

गता शक्तिः सामर्थ्यं यस्य स विगतशक्तिः शक्तिविहीनोऽपि। कविर्दृष्टान्तमाह- **मृगो** हरिणो, म( मृ )**गेन्द्रं** सिंहं, [१]**किं** न?

**अभ्येति ?**-किं न अभिमुखो गच्छति, अपि तु अभ्येति। किमर्थं? **निजशिशो** र्निजबालकस्य, **परिपालनार्थं,** निजबालकरक्षणार्थं। कया?-**प्रीत्या** स्नेहेन, किं कृत्वा?-**आत्मवीर्यं** निज प्रा(परा)क्रमं अविचार्य [अवगणय्य] इत्यर्थः, यथा मृगो मृगेन्द्रं प्रति अभ्येति व्रजति, तथा अहमपि विगतशक्तिः सत् स्तोतुं समुद्यतमतिः इति भावः ॥५॥

**अल्पश्रुतं श्रुतवतां परिहासधाम**
**त्वद्भक्तिरेव मुखरीकुरुते बलान्माम्।**
**यत् कोकिलः किल मधौ मधुरं विरौति**
**तच्चारुचूतकलिकानिकरैकहेतुः ॥६॥**

**( ६ ) अमर० अव० अल्पश्रुतं०**-हे **आदिनाथ** ! **त्वद्भक्तिरेव बलात्** बलात्कारेण, **मां मुखरीकुरुते** मां वाचालयति वाचालत्वं करोति, । किंविशिष्टं मां? **अल्पश्रुतं [ अल्पं** स्तोकं **श्रुतं ]** आगमलक्षणं स्तोकं शास्त्रं यस्य स-अल्पश्रुतः, तं अल्पश्रुतं, पुनः किंविशिष्टं माम्? **श्रुतवतां परिहासधाम** पण्डितानां [आगमज्ञानां] मध्ये, परिहासधाम-**परि** सामस्त्येन हासधाम

उपहासमन्दिरम्। कविर्दृष्टान्तमाह-**यत्** यस्मात् कारणात्, **किल** इति सत्ये, **कोकिलो मधौ** वसन्ते, **मधुरं** मनोहरं (मनोज्ञं) **विरौति** शब्दायते रम्यं शब्दं करोति, **तत्** न कोकिलस्य सहजो गुणः, पुनः किं तत्?-**चारुचूत-**

१. अत्राप्यन्वयभेदो यथा-'प्रीत्या स्नेहन, निजशिशोः निजबालकस्य परिपालनार्थम् किं न०' [पा० २, को।]

**कलिकानिकरैकहेतुः** चार्वो मनोज्ञा, ये आम्रकलिकानिकराः आम्रमञ्जरी-समूहाः, तेषां(ते) एकः हेतुः एककारणं प्रधानाम्रमञ्जरीसमूहास्वादु(द)-कारणम् ॥६॥

**त्वत्संस्तवेन भवसन्ततिसन्निबद्धं**
**पापं क्षणात् क्षयमुपैति शरीरभाजाम्।**
**आक्रान्तलोकमलिनीलमशेषमाशु**
**सूर्यांशुभिन्नमिव शार्वरमन्धकारम् ॥७॥**

(७) **अमर० अव० त्वत्संस्त०**-हे **आदिनाथ ! शरीरभाजां** मनुष्याणां, **पापं** पातकं, **त्वत्संस्तवेन** तव स्तोत्रेण क्षणात् क्षणमात्रेण (क्षणेन) **क्षयं उपैति** गच्छति, किंविशिष्टं पापं ? -**भवसन्ततिसन्निबद्धं** भवसन्तत्या संसारभ्रमणश्रेण्या सन्निबद्धं अनन्तभवोपार्जितं यत् तत् भवसन्तति-सन्निबद्धम्, तत् पापं किमिव ? **सा( शा )र्वरं** रात्रिसंबंधि, **अन्धकार**मिव, शर्वर्व्या रात्र्या इदं शार्वरं, यथा **अशेषं** समस्तं, शार्वरमन्धकारं, **आशु** शीघ्रं, **सूर्यांशुभिन्नं** सूर्यकिरणविदारि सत् क्षयं उपैति विनाशं याति, किंविशिष्टं अन्धकारं ? **आक्रान्तलोकं** आक्रान्तो व्याप्तो लोको येन तत्-आक्रान्तलोकं, पुनः किंविशिष्टं अन्धकारं ?-**अलिनीलम्**-अलि[वद्]भ्रमरवत्, नीलं श्यामं, अलिनीलम्, अर्थादेवं(दुर्)दिने भूमिगृहे वा, यत् अन्धकारं भवति, तत् सूर्येण न याति, अतः अभव्यानां पापं न याति, कथं ?-त्वयि उदिते दृष्टे येषां पापं न गतं ते अभव्याः ॥७॥

**मत्वेति नाथ ! तव संस्तवनं मयेद-**

**मारभ्यते तनुधियाऽपि तव प्रभावात् ।**

**चेतो हरिष्यति सतां नलिनीदलेषु**

**मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ॥८॥**

**( ८ ) अमर० अव० मत्वेति०** हे **नाथ ! युगादिदेव** ! पूर्वोक्तस्वरूपं, **मत्वा** ज्ञात्वा, **इदं** तत्[तव] [सं]**स्तवनं** स्तोत्रं मया **आरभ्यते,** इदं स्तवनं क्रियमाणं सत्, **सतां** उत्तमानां, **चेतो हरिष्यति,** तव संस्तवेन अनन्तभवोपार्जितं पातकं यास्यत्येव, कस्मात् तव प्रभावात्, किंविशिष्टेन मया ?-**तनुधियाऽपि**-तनुः स्तोका धीर्बुद्धिर्यस्य स तनुधीः, तेन तनुधिया स्तोकधिया (स्तोक-बुद्धिनाऽपि) पूर्वोक्तमर्थं दृष्टान्तेन दृढयति-**ननु** इति वितर्के, ननु इति निश्चितं, **उदकबिन्दु**र्जलबिन्दुः, **नलिनीदलेषु** कमलिनीपत्रेषु, स्थितः सन् **मुक्ता-फलद्युतिं** मुक्ताफलकान्तिं, **उपैति** गच्छति, एवंविधि[विधो]जलबिन्दु[उदक-बिन्दु]र्नलिनीदलेषु स्थितः सन् मुक्ताफलभ्रान्त्या सतां उत्तमानां चेतो हरिष्यति हरति, अपि तु उपगच्छति, तथा अयमेव स्तवनं साधूनां चेतो हरिष्यति ॥८॥

**आस्तां तव स्तवनमस्तसमस्तदोषं**

**त्वत्संकथाऽपि जगतां दुरितानि हन्ति ।**

**दूरे सहस्त्रकिरणः कुरुते प्रभैव**

**पद्माकरेषु जलजानि विकासभाञ्जि ॥९॥**

**( ९ ) अमर० अव० आस्ताम्** इति हे **युगादिदेव** ! **तव स्तवनं**-[स्तोत्रं]**आस्तां** दूरे तिष्ठतु, किंविशिष्टं तव स्तवनं ?-**अस्तसमस्तदोषं, अस्ताः**

क्षयं नीताः, **समस्तदोषा** येन तत् **अस्तसमस्तदोषं**, हे नाथ ! **त्वत्सङ्कथा**-ऽपि त्वद्वार्त्ताऽपि, **जगतां** विश्वलोकानां, **दुरितानि** पातकानि **हन्ति**, विनाशयति, कविर्दृष्टान्तमाह-**सहस्त्रकिरणः** सूर्यो, दूरे तिष्ठतु(तिष्ठति), सूर्यस्य प्रभैव कान्तिरेव **पद्माकरेषु** सरोवरेषु, **जलजानि** कमलानि, **विकाशभाञ्जि** विकाशितानि (विकाशाश्रयाणि) कुरुते, प्रभापि कमलानि विकाशयति यथा, तथा सङ्कथाऽपि वार्त्ताऽपि दुरितानि हन्ति, यथा सूर्यस्तथा स्तोत्रं, यथा प्रभा तथा सङ्कथा इति भावः ॥९॥

**नात्यद्भुतं भुवनभूषण ! भूतनाथ !**
**भूतैर्गुणैर्भुवि भवन्तमभिष्टुवन्तः ।**
**तुल्या भवन्ति भवतो ननु तेन किं वा**
**भूत्याश्रितं य इह नात्मसमं करोति ॥१०॥**

(१०) **अमर० अव० नात्य०** [इति] हे भुवनभूषण ! भुवने विश्वलोके, त्वं भूषणः अलङ्कारः स भुवनभूषणः, तस्य संबोधनं क्रियते ! हे **भुवनभूषण !** हे भूतनाथ ! **भूताः** प्राणिनः, तेषां नाथः स्वामी स भूतनाथः, तस्य संबोधनं-क्रियते-हे **भूतनाथ** ! युगादिदेव !, **ननु** इति वितर्के[आमन्त्रणे] ननु इति निश्चितं, ते नराः मनुष्याः, **भवन्तं** त्वां, **भूतैर्गुणैः भुवि** पृथिव्यां, **अभिष्टुवन्तः** सन्तः, **किंवा भवतस्तुल्या न भवन्ति**, अपि तु भवन्त्येव, इति [**अति**] **अद्भुतं** आश्चर्यः, **न**, वीतरागं ध्यायन् वीतरागो भवेदित्यर्थः, ईलिका भ्रमरीध्यानात् ध्यायन्ती भ्रमरी भवेत् [तत्] न कौतुकं, एतत् दृष्टान्तमाह-**यः** सत्पुरुषः, **इह** संसारे, **आश्रितं** नरं, **भूत्या** लक्ष्म्या, **आत्मसमं** आत्मतुल्यं, **न करोति** ? अपि तु करोत्येव ॥१०॥

**दृष्ट्वा भवन्तमनिमेषविलोकनीयं**

**नान्यत्र तोषमुपयाति जनस्य चक्षुः ।**

**पीत्वा पयः शशिकरद्युति दुग्धसिन्धोः**

**क्षारं जलं जलनिधेरसितुं क इच्छेत् ? ॥११॥**

**(११) अमर० अव० दृष्ट्वा०** [इति] हे स्वामिन् ! **जनस्य** (लोकस्य) **चक्षुः** (लोचनं) **अन्यत्र** कुदेवे[षु]**हरि**-हरादिषु, **तोषं** सन्तोषं, **न उपयाति** न गच्छति, किंकृत्वा-**भवन्तं दृष्ट्वा,** [किंविशिष्टं भवन्तम् ?] अनिमेष[विलोकनीयं] अनिमेषं विलोक्यते इति, मेषोन्मेष-रहितदर्शनीयं, [कविः] दृष्टान्तमाह-**जलनिधेर्**लवणसमुद्रस्य, **क्षारं जलं रसितुं** पातुं **कः इच्छेत्** ? अपि तु कोपि न, किं कृत्वा ?-**दुग्धसिन्धोः** क्षीरसमुद्रस्य, **पयो जलं पीत्वा**[१], किंविशिष्टं पयः ?-**शशिकरद्युति**=शशिकरवत् चन्द्रकिरणवत् द्युतिः कान्तिर्यस्य तत् - शशिकरद्युति ॥११॥

**यैः शान्तरागरुचिभिः परमाणुभिस्त्वं**

**निर्मापितस्त्रिभुवनैकललामभूत ! ।**

**तावन्त एव खलु तेऽप्यणवः पृथिव्यां**

**यत् ते समानमपरं नहि रूपमस्ति ॥१२॥**

**(१२) अमर० अव०** [**यैः शान्त०** इति] **यैः** हे **त्रिभुवनैकल-लामभूत** ? त्रिभुवनस्य जगत्त्रितयस्य, **एकोऽ**द्वितीयो, **ललामभूत**-स्

१. अत्र भिन्नोऽन्वयो यथा - लोचनं भवन्तं त्वां वीतरागं दृष्ट्वा अन्यत्र...न गच्छति, किंविशिष्टं. चक्षुः [भवन्तम्] अनिमेष....दृष्टान्तमाह-दुग्धसिन्धोः क्षीरसमुद्रस्य पयो जलं पीत्वा जलनिधेः....क्षारं जलं...असितुं....क...इच्छेत् - [पा. २. को०] ॥

तिलकभूतः, स त्रिभुवनैकललामभूत[ः-तस्य संबोधनं क्रियते]-त्रिभुवनैकललामभूत! यैः **परमाणुभिः** पुद्गलैः **त्वं निर्मापितो** [१]निष्पादितः,

**पृथिव्यां खलु** निश्चितं, **तेऽपि अणवः** परमाणवः, **तावन्त एव** तावन्मात्रा एव, न अधिकाः, किंविशिष्टैः परमाणुभिः ? **शान्ति( न्त )रागरुचिभिः** शान्त उपशमितो योऽसौ रागः स शान्तरागः, तस्मात् **रुचि**रभिलाषो येषां ते शान्तरागरुचयः, तैः शान्तरागरुचिभिः, **हि** स्फुटं निश्चितं, **यत्** यस्मात् कारणात्, **ते** तव, **समानं** त्वत्-सदृशं, सर्वगुणसम्पूर्णं, **अपरं** अन्यद्, **रूपं** नास्ति, ॥१२॥

**वक्त्रं क्व ते सुरनरोरगनेत्रहारि**
**निःशेषनिर्जितजगत्त्रितयोपमानम्।**
**बिम्बं कलङ्कमलिनं क्व निशाकरस्य**
**यद् वासरे भवति पाण्डुपलाशकल्पम् ॥१३॥**

**( १३ ) अमर० अव० वक्त्रं**[० इति] हे **युगादिदेव** !, **ते** तव, **वक्त्रं** मुखं **क्व, निशाकरस्य** चन्द्रस्य, **कलङ्कमलिनं बिम्बं** मण्डलं **क्व,** क्वशब्दौ महदन्तरं [दर्शयतः] एतद् भावात् उपमानं न घटते, कविरुपमानस्य तिरस्कारत्वमाह-किंविशिष्टं ते वक्त्रं ?-**सुर-नरोरगनेत्र-हारि,** सुराणां नराणां [उरगानां] नागकुमाराणां, **नेत्राणि** लोचनानि, हरति-इति-सुरनरोरग-नेत्रहारि-त्रिभुवनजनमनोनेत्राऽऽनन्ददायि, पुनः किंविशिष्टं ते वक्त्रं ?-**निश्शेषनिर्जित-जगत्त्रितयोपमानं,** निश्शेषं समस्तं निर्जितं जगत्त्रितयस्य, उपमानं ये[न तद्

१. अन्वयभेदोऽत्राप्येवं-निष्पादितः-कैः ?-परमाणुभिः किंविशिष्टैः ?-शान्तरागरुचिभिः... खलु निश्चयेन तेऽपि अणवः पृथिव्यां तावन्त एव, हि स्फुटं...[पा० २, को०] ॥

निःशेष-निर्जितजगत्त्रितयोपमानम्] पुनः **यच्चन्द्रस्य** बिम्बं मण्डलं, **वासरे** दिवसे, **पाण्डुपलाशकल्पं** पीतपत्रतुल्यं, भवति श्वेतपलाशसदृशं सञ्जायते, कलङ्केन लाञ्छनेन मलिनीकृतं एवंभूतं चन्द्रबिम्बं क्व, च पुनः, तव वक्त्रं तवाननं(क्व) यत् कविभिश्चन्द्रमण्डलतुल्यं वर्ण्यते-एवं तवाननं[न] ॥१३॥

**सम्पूर्णमण्डलशशाङ्ककलाकलाप-**
**शुभ्रा गुणास्त्रिभुवनं तव लङ्घयन्ति।**
**ये संश्रितास्त्रिजगदीश्वर! नाथमेकं**
**कस्तान् निवारयति सञ्चरतो यथेष्टम्? ॥१४॥**

**(१४) अमर० अव० संपूर्ण०** [इति] हे **त्रिजगदीश्वर**! जगत्त्रितय-नायक ! **तव ये गुणाः त्रिभुवनं लङ्घयन्ति** आक्रमन्ति, प्राप्नुवन्ति, किंविशिष्टाः ते तव गुणाः ? एकं अद्वितीयं, **नाथं** स्वामिनं, **भवन्तं** त्वां संश्रिताः, पुनः किंविशिष्टाः गुणाः ?-**संपूर्णमण्डल-शशाङ्ककलाकलाप-शुभ्राः** संपूर्णमण्डलश्चाऽसौ शशाङ्कश्च संपूर्णमण्डलशशाङ्कः, तस्य कलाकलापवत् कलासमूहवत्, शुभ्रा उज्ज्वला ये ते संपूर्णमण्डलशशाङ्क-कलाकलापशुभ्राः । **तान्** गुणान्, **यथेष्टं** स्वच्छन्दं, **सञ्चरन्तः** (रतः) आक्रमन्तः सतः **को निवारयति,** एकं **त्रिजगदीश्वरनाथं संश्रिताः** आश्रिताः, अन्येऽपि ये स्वैरं प्रभुमाश्रिता भवन्ति तान् यथेष्टं सञ्चरन्तः (तः) कोऽपि न निवारयति इति भावः ॥१४॥

**चित्रं किमत्र यदि ते त्रिदशाङ्गनाभिर्-**
**नीतं मनागपि मनो न विकारमार्गम्।**
**कल्पान्तकालमरुता चलिताचलेन**
**किं मन्दराद्रिशिखरं चलितं कदाचित्? ॥१५॥**

**(१५) अमर० अव० चित्रं कि०** [इति] भो **आदिदेव** ! **यदि त्रिदशाङ्गनाभिर्**देवयोषिद्भिः, **ते** तव, **मनश्**चित्तं, **मनागपि** स्तोकमपि, **विकारमार्गं** विक्रियामार्गं, न **नीतं** [न आवर्जितम्], **अत्र किं चित्रं** किमाश्चर्यम्, दृष्टान्तमाह-**कल्पान्तकालमरुता** प्रलयकालवायुना, **मन्दराद्रि-शिखरं** मेरुगिरिशृङ्गं, **कदाचित् किं चल(लि)तं** भवति ?- अपि तु न चलितं, किंविशिष्टेन कल्पान्तकालमरुता ?-**चलिताऽचलेन, चलिताः** कम्पं नीताः, अचलाः पर्वता येन स चलिताचलः, तेन चलिताचलेन ॥१५॥

**निर्धूमवर्तिरपवर्जिततैलपूरः**
**कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि ।**
**गम्यो न जातु मरुतां चलिताचलानां**
**दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥१६॥**

**(१६) अमर० अव० निर्धूम०** [इति] हे **नाथ** ! **युगादिदेव** !, **त्वं अपरो** अन्यो **दीपोऽसि** अपूर्वो दीपो वर्तसे आश्चर्यमयो दीपो वर्तसे, किंविशिष्टस्त्वं अपरदीपः ?-**जगत्प्रकाशः** जगदुद्द्योतकारकः [करः] अन्योऽपि (अपरोऽपि) दीपो गृहान्धकारं स्फो(स्फे)टयितुं क्षमो भवति, त्वं विश्वान्धकारस्फो(स्फे)टकः, अन्यो दीपः, अतएव त्वं **कृत्स्नं** समस्तं, **जगत्त्रयं इदं**-भुवनत्रयं **प्रकटीकरोषि** प्रकटयसि, किंविशिष्टः त्वं दीपः ? **निर्धूम-वर्त्तिः निर्धूमा** धूमरहिता, **वर्त्तिः** रेष(षा)लक्षणा यस्य स निर्धूम-वर्त्ती(र्त्तिः) । पुनः किंविशिष्टः त्वं अपरः प्रदीपः ?-**अपवर्जिततैलपूरः** अपवर्जितः(रहितः)तैलपूरः स्नेहपूरो यस्य स-अपवर्जिततैलपूरः, पुनः किंविशिष्टस्त्वं अपरः प्रदीपः ?

-**अपवर्जिततैलपूरः** अपवर्जितः(रहितः)तैलपूरः स्नेहपूरो यस्य स-अपवर्जिततैलपूरः, पुनः किंविशिष्टस्त्वं अपरः प्रदीपः ?**जातु** कदाचित्, **मरुतां** वायूनां, **न गम्यः**, न पराभवनीयः, किंविशिष्टानां मरुतां ?-**चलिताऽचलानां, चलिताः** कम्पं नीताः, **अचलाः** पर्वता यैस्ते-चलिताऽचलाः, तेषां चलिताचलानां, यः खलु अन्यो दीपो भवति, स तैलपूरः स्यात्, अयमेव तद्विरहितः, अन्यो दीपः कृत्स्नं जगत्त्रयं न प्रकटीकरोति, अन्यो दीपो धूमवर्त्तिरहितो न भवति-धूमश्च वर्त्तिश्च धूम-वर्त्ती, [1]तयोरहितः ॥१६॥

**नास्तं कदाचिदुपयासि न राहुगम्यः**
**स्पष्टीकरोषि सहसा युगपज्जगन्ति ।**
**नाम्भोधरोदरनिरुद्धमहाप्रभावः**
**सूर्यातिशायिमहिमाऽसि मुनीन्द्र ! लोके ॥१७॥**

**(१७) अमर० अव० ना०** [इति] हे **मुनीन्द्र** ! श्री**आदिदेव** !, मुनीनां तपोधनानां मध्ये इन्द्रो मुनीन्द्रस्तस्य संबोधनं क्रियते-हे मुनीन्द्र !, **लोके** विश्वलोके, **त्वं सूर्याति-शायिमहिमा असि** वर्तसे सूर्यं[अतिशेते जयति इति सूर्या]ऽतिशायि महिमा [यस्य सः] सूर्याधिक(=सूर्यातिशायि)महिमा वर्त्तसे, याति, त्वं **कदाचित् अस्तं न उपयासि, उपैति** प्रयासि न गच्छसि, अन्यः सूर्योऽस्तं याति, त्वं **राहुगम्यो न, राहु**पराभवनीयो न असि, त्वं **सहसा युगपत्** समकालं, **जगन्ति** भुवनत्रयाणि, **स्पष्टीकरोषि,** प्रकटयसि, किंविशिष्टः त्वं ?-

१. पूर्वं प्रभोरुपमाने 'निधूर्मवर्त्तिः' पदस्य विशेषणबहुवीहिः समासः, अपरदीपोपमाने द्वन्द्वबहुव्रीहिः समासः-इति अत्र वैशिष्ट्यम् ।

**ना( न अ )म्भोधरोदरेण निरुद्धो महाप्रभावो** यस्य(स) ना(न अ)म्भोधरोदर-निरुद्ध-महाप्रभावः, अत एव सूर्याधिकमहिमा त्वं वर्तसे, अम्भोधरेण मेघेन निरुद्धआच्छादितो महाप्रभावो यस्य सः, तथा अन्यः सूर्योऽम्भोधरेण [निरुद्ध्यते] अस्तं[च] प्रयाति, त्वं तथा न राहोः गम्यः, अन्योर्को राहुगम्यो भवति, अन्योऽर्को दिवा उद्योतयति, न रात्रौ उद्योतयति, त्वं तथा न निरुद्धप्रभावो भवति ॥१७॥

**नित्योदयं दलितमोहमहान्धकारं**
**गम्यं न राहुवदनस्य न वारिदानाम् ।**
**विभ्राजते तव मुखाब्जमनल्पकान्ति**
**विद्योतयज्जगदपूर्वशशाङ्कबिम्बम् ॥१८॥**

**( १८ ) अमर० अव० नित्यो०** [इति] हे **युगादिदेव** ! **तव मुखाब्जं** मुखकमलं, अपूर्वशशाङ्कबिम्बं, **विभ्राजते** शोभते-अपूर्वं अद्भुतं शशाङ्कबिम्बं चन्द्रमण्डलं इव तत् अपूर्वशशाङ्कबिम्बं, किंविशिष्टं मुखाब्जं ?- **अनल्पकान्ति** अनल्पा प्रचुरा कान्तिः यस्य तत्-अनल्पकान्ति बहुकलायुक्तं, चन्द्रबिम्बं कलाहीनं वर्तते, किं कुर्वत् यत् ? **जगत्** विश्वलोकं, **विद्योतयत्** प्रकाशयत्, किंविशिष्टं मुखाब्जं ?-**नित्योदयं** नित्यं उदयो यस्य तद्-**नित्योदयं**, अतः कारणात् अपूर्वता, पुनः किंविशिष्टं मुखाब्जं ?-**दलितमोह-महान्धकारं**-दलितं (छेदितं) चूर्णितं, मोह एव महान्धकारं येन तत्-दलित-मोहमहान्धकारं, मोहान्धकारविनाशकारकारकम्, पुनः-किंविशिष्टं मुखाब्जं ?-दुर्वादि**राहुवदनस्य न गम्यं** न पराभवनीयम्, तच्चन्द्रबिम्बं राहुगम्यमस्ति, पुनः किंविशिष्टं मुखाब्जं ?

-अष्टकर्मरिपूणां **वारिदानां**, न गम्यं, तत् चन्द्रबिम्बं मेघगम्यमस्ति, अतः कारणात्, ते तव मुखाब्जं अपूर्व-शशाङ्कबिम्बं शोभते, चन्द्रमण्डलं नित्योदयं न भवति, मो(म)हान्ध-कारस्फोटनं-(स्फेटनं न) भवति राहुगम्यं च भवति ॥१८॥

**किं शर्वरीषु शशिनाऽह्नि विवस्वता वा ?**

**युष्मन्मुखेन्दुदलितेषु तमस्सु नाथ ! ।**

**निष्पन्नशालिवनशालिनि जीवलोके**

**कार्यं कियज्जलधरैर्जलभारनम्रैः ? ॥१९॥**

**( १९ ) अमर० अव० किं०** [इति] हे [**नाथ !**] युगादिदेव ! **तमस्सु** अन्धकारेषु, **युष्मन्मुखेन्दुदलितेषु** त्वन्मुखचन्द्रचूर्णितेषु सत्सु, **स( श )र्वरीषु** रात्रिषु, **शशिना** चन्द्रेण, **किं** कार्यम् ? **वा** अथवा तमस्सु अन्धकारेषु युष्मन्मुखेन्दुदलितेषु त्वन्मुखचन्द्रेण चूर्णितेषु सत्सु, **अह्नि** दिवसे **विवश्व( स्व )ता** सूर्येण, **किं** कार्यम् ?, दृष्टान्तमाह-**जलधरै**र्मेघै **र्जलभारनम्रैः** जलभारनमनशीलैः **कार्यं कियत्** ? अपि तु न कार्यम्, क्व सति ? **जीवलोके** मनुष्यलोके, **निष्पन्नशालिवनशालिनि** सति **निष्पन्नं शालिवनं** व्रीहिवनं, तेन **शालते** शोभते इत्येवं शीलः निष्पन्नशालिवनशाली, तस्मिन् निष्पन्न-शालिवनशालिनि ॥१९॥

**ज्ञानं यथा त्वयि विभाति कृतावकाशं**

**नैवं तथा हरिहरादिषु नायकेषु ।**

**तेजः स्फुरन्मणिषु याति यथा महत्त्वं**

**नैवं तु काचशकले किरणाकुलेऽपि ॥२०॥**

**( २० ) अमर० अव० ज्ञानं०** [इति] हे जगन्नाथ **युगादिदेव** ! **त्वयि** [तव] विषये **यथा ज्ञानं विभाति** शोभते, **तथा हरिहरादिषु एवं ज्ञानं न ( एवं ) विभाति** शोभते, किंविशिष्टेषु-हरि-हरादिषु ?-**नायकेषु** लोक-भाषया त्रिभुवनस्वामिषु, किंविशिष्टं ज्ञानं ? **कृतावकाशं** कृतश्चतुर्दश-रज्ज्वात्मकलोकालोकेषु अवकाश उद्द्योतो येन तत् - कृतावकाशम्, दृष्टान्तमाह-**यथा मणिषु** रत्नेषु, स्फुरत् उल्लसत्, **तेजो महत्वं** महार्घ्यभावं गरिष्ठभावं याति, तथा **एवं** अमुना प्रकारेण काचशकलेऽपि स्फुरत्तेजो महार्घ्यभावं **न** याति, किंविशिष्टे काचशकले ?-**किरणाऽऽकुलेऽपि** किरणैस्तेजोभिराकुलं किरणाकुलं, तस्मिन् किरणाकुले, अपि निश्चयेन, ॥२०॥

**मन्ये वरं हरिहरादय एव दृष्टा**
**दृष्टेषु येषु हृदयं त्वयि तोषमेति ।**
**किं वीक्षितेन भवता भुवि येन नान्यः**
**कश्चिन्मनो हरति नाथ ! भवान्तरेऽपि ॥२१॥**

**( २१ ) अमर० अव० मन्ये०** [इति] हे जगन्नाथ ! **हरि-हरादयो** देवा, **दृष्टा एव वरं** प्रधानं, [१]**मन्ये येषु** हरि-हरादिषु देवेषु **दृष्टेषु** सत्सु, **त्वयि** [तव]विषये, **हृदयं** चित्तं, **तोषं** प्रमोदं, **एति** याति, **भवता** त्वया वीतरागेण **वीक्षितेन दृष्टेन भुवि** पृथिव्यां **किं, अन्यः** कश्चिद् देवो हरि-हरादि**र्भवान्तरेपि** परलोकेऽपि, **मनो न हरति** ॥२१॥

---

१. 'अहं एवं मन्ये' हरि-हरादय एव दृष्टाः, वरं प्रधानं, येषु 'इत्यत्राप्यन्वयो भिन्नः- [पा० २, को०] ॥

**स्त्रीणां शतानि शतशो जनयन्ति पुत्रान्**
**नान्या सुतं त्वदुपमं जननी प्रसूता ।**
**सर्वा दिशो दधति भानि सहस्त्ररश्मिं**
**प्राच्येव दिग् जनयति स्फुरदंशुजालम् ॥२२॥**

**( २२ ) अमर० अव० स्त्रीणां०** [इति] हे नाथ ! **स्त्रीणां शतानि शतशः पुत्रान् जनयन्ति** शतशः संख्या[न्] सहस्त्रसङ्ख्या[न्] लक्ष-कोटि सङ्ख्या[न्] पुत्रान् जनयन्ति प्रसवन्ति, पुनः कापि **अन्या जननी** त्वन्मातु[त]रं विना, **त्वदुपमं सुतं न प्रसूता,** दृष्टान्तमाह-**सर्वा दिशो भानि** नक्षत्राणि **दधति** धारयन्ति, परन्तु **प्राच्येव** पूर्वा **दिक्**[हि] **सहस्त्ररश्मिं जनयति** प्रसूते, अपरा दिशः सहस्त्ररश्मिं श्रीसूर्यं न जनयन्ति, किंविशिष्टं सहस्त्ररश्मिम् ?-**स्फुरदंशुजालं** स्फुरद् देदीप्यमानं अंशुजालं किरणवृन्दं यस्य सः, स्फुर-दंशुजालः तं स्फुरदंशुजालम् ॥२२॥

**त्वामामनन्ति मुनयः परमं पुमांस-**
**मादित्यवर्णममलं तमसः परस्तात् ।**
**त्वामेव सम्यगुपलभ्य जयन्ति मृत्युं**
**नान्यः शिवः शिवपदस्य मुनीन्द्र ! पन्थाः ॥२३॥**

**( २३ ) अमर० अव० त्वामा०** [इति] हे **युगादिदेव** ! **मुनयः त्वां, परमं प्रकृष्टं, पुमांसं** परमपुरुषं, **आमनन्ति** कथयन्ति, किंविशिष्टं त्वां परमपुरुषम् ?-**आदित्यवर्णं** आदित्यवत् दीप्यमानो, वर्णो यस्य स, तम्, पुनः किंविशिष्टं त्वाम् ? -**अमलं** रागादिमलरहितम्, पुनः किंविशिष्टं त्वाम् ?-**तमसो** दुरितस्य पातकस्य, **पुरस्तात्** पुरु(र)तो वर्तमानम्, **मुनयस्त्वां** [एव] **सम्यक् उपलभ्य** प्राप्य **मृत्युं** मरणं, **जयन्ति** भवोत्तरणं कुर्वन्ति, कविर्दीप्त्यर्थ-त्वमाह-हे **मुनीन्द्र** ! हे

**युगादिदेव** ! **शिवपदस्य** मोक्षस्थानस्य, त्वां विना **अन्यः पन्था** मार्गः **नास्ति**, किंविशिष्टः पन्था ?-**शिवः** निरुपद्रवः ॥२३॥

**त्वामव्ययं विभुमचिन्त्यमसङ्ख्यमाद्यं**
**ब्रह्माणमीश्वरमनन्तमनङ्गकेतुम् ।**
**योगीश्वरं विदितयोगमनेकमेकं**
**ज्ञानस्वरूपममलं प्रवदन्ति सन्तः ॥२४॥**

**( २४ ) अमर० अव० त्वाम०** [इति] हे **युगादिदेव** ! **सन्तः** सत्पुरुषाः विचक्षणाः, सर्वदर्शिनो यतयः **त्वाम् अव्ययं** एवंविधं **प्रवदन्ति** प्रकर्षेण भणन्ति, [किंविशिष्टं त्वां प्रवदन्ति ?] **अव्ययं** न व्येति न क्षयं याति-इति [अव्ययः, तं] अव्ययम् अक्षयमित्यर्थः [किंविशिष्टं त्वां प्रवदन्ति ?] त्वां **विभुं** प्रवदन्ति, जगत्त्रयस्वामित्वात्, विभाति परमैश्वर्येण इति विभुः तं विभुम् । द्वितीयोऽर्थो भण्यते-विभवति कर्मोन्मूलने समर्थो भवति इति विभुः, तं विभुम् अथवा सकलनरदेवानां सुरेन्द्राणां विभुः, स्वामीति, तं विभुम्, पुनः किं कृत्वा ? [किंविशिष्टं] त्वां प्रवदन्ति ? **अचिन्त्यं** प्रवदन्ति, आध्यात्मिकैः पुरुषैश्चिन्तितुमशक्यः इति अचिन्त्यः, तम् अचिन्त्यम्,-चिन्तातीतमिति, [पुनः किंविशिष्टं त्वां प्रवदन्ति ?] **असङ्ख्यं** प्रवदन्ति,-न विद्यते [गुणानां] संख्या यस्याऽसौ असंख्यः संख्यातीतगुणाकरत्वात्-असंख्यः, तं असंख्यम् । पुनः [किंविशिष्टं त्वां प्रवदन्ति ?] **आद्यं** प्रवदन्ति, - आदौ भवः आद्यः, तं आद्यं,

चतुर्विंशतिजिनेषु आद्यः प्रथमतीर्थकरः, अथवा स्वतीर्थ-स्यादिकरत्वात् आद्यः, तम् आद्यम्, [पुनः किंविशिष्टं त्वां प्रवदन्ति ?]-

परमानन्देन वर्धते इति ब्रह्मा, तं ब्रह्माणं, सर्वकर्ममुक्तं वा धर्मस्पष्टकरणत्वात्, पुनः [किंविशिष्टं त्वां प्रवदन्ति ?]-सकलसुरासुरेषु ईशितुं शीलं अस्य-तम् **ईश्वरं** प्रवदन्ति-त्रिभुवनस्वामिनमिति त्वां [पुनः किंविशिष्टं त्वां प्रवदन्ति ?]-**अनन्तं** प्रवदन्ति-ज्ञान-दर्शनयोगात्, **अनन्तं,** वा अथवा न विद्यते अन्तो गुणेषु [अथवा अन्तो मरणं] यस्य स, अनन्तः, तं अनन्तम्, पुनः [किंविशिष्टं त्वां प्रवदन्ति ?]-त्वां **अनङ्गकेतुं** प्रवदन्ति-अनङ्गस्य कन्दर्पस्य केतुः, क्षयहेतुत्वात् [अनङ्ग-केतुः] तं अनङ्गकेतुं, यथा केतोरुदयो जगत्क्षयं कुरुते, तथा भगवान् कन्दर्पस्य क्षयहेतुः, [वा] न विद्यते औदारिक-वैक्रियाऽऽहारक-तैजस-कार्मणानां [अङ्गानां] केतुं चिह्नं यस्य स तम्, अङ्गलक्ष[ण केतुना पताक]या वर्जितम्, अर्थात् कन्दर्पमारकं इति, पुनः-[किंविशिष्टं त्वां प्रवदन्ति ?] **योगीश्वरं** प्रवदन्ति-**योगिनश्च** ज्ञानिनो मुनिवराः, तेषां **ईश्वरः** स्वामी योगीश्वरः, तं योगीश्वरम्, पुनः [किंविशिष्टं त्वां प्रवदन्ति ?] त्वां **विदितयोगम्** प्रवदन्ति **विदितो** ज्ञातो ज्ञान-श्रद्धान-चारित्रात्मको **योगो** येन स तम्, पुनः [किंविशिष्टं त्वाम् प्रवदन्ति ?]-त्वाम् **अनेकं** प्रवदन्ति गुण-पर्यायापेक्षा(क्ष)या [1]नामाद्भुत-स्थापनाद्भुत-द्रव्याद्भुत-भावाद्भुतम् भावना(भावा)दीनामपेक्षया त्वम्, अनेक इति - तं अनेकम्, पुनः [किंविशिष्टं त्वां प्रवदन्ति ?] त्वां **एकं** प्रवदन्ति अद्वितीयं कथयन्ति-न तव सदृशोऽन्यः कोऽपि वर्तते, पुनः [किंविशिष्टं त्वां प्रवदन्ति ?]-त्वां **ज्ञानस्वरूपं** प्रवदन्ति **ज्ञानं** केवलं शुद्धं तदेव **स्वरूपं** यस्य स [ज्ञानस्वरूपः]तं ज्ञानस्वरूपम्, पुनः [किंविशिष्टं त्वां प्रवदन्ति ?] त्वाम् **अमलं** प्रवदन्ति-**न** विद्यते रागादि**मलो** यस्य सः, अमलः तम् अमलम् ॥२४॥

१. 'नामार्हन् स्थापनार्हन् द्रव्यार्हन् = भावादीनामपेक्षया'-इति पा० २, को, प्रतगतः पाठः साधुः ।

**बुद्धस्त्वमेव विबुधार्चितबुद्धिबोधात्**
**त्वं शङ्करोऽसि भुवनत्रयशङ्करत्वात्।**
**धाताऽसि धीर! शिवमार्गविधेर्विधानाद्**
**व्यक्तं त्वमेव भगवन्! पुरुषोत्तमोऽसि ॥२५॥**

**(२५) अमर० अव० बुद्ध०** [इति] हे **विबुधार्चित ! विबुधैर्देवैः, अर्चितः** पूजितो विबुधाऽर्चितः, तस्य संबोधनं क्रियते हे विबुधाऽर्चित ! **युगादिदेव** ! **त्वमेव बुद्धः** ज्ञाततत्त्वः, कस्मात् ?-**बुद्धिबोधात्** बुद्धि-प्रगटनात्। बुद्धदर्शि(दर्शनि)नां मते [अपि]त्वमेव बुद्धः बुद्धदेवता, कस्मात् ? बुद्धिबोधात् मतिप्रकाशात्, यदुक्तं-

बुद्धिर्भवति बौद्धेषु, जडत्वं शिवशासने।
माया श्वेताम्बरे प्रोक्ता, पिशुनत्वं दिगम्बरे॥१॥

हे **युगादिदेव** ! **त्वं** शङ्करोऽसि[शिवः]वर्त्तसे, शं सुखं करोति-इति शङ्करः, कस्मात् ?-**भुवनत्रयशङ्करत्वात्** त्रिलोकीसुखकारित्वात्, परन्तु शङ्करो=रुद्रो नग्नः त्रिशूली न भवसि [हे **धीर**!] **त्वं धाताऽसि** वर्त्तसे-दधाति इति धाता असि, त्वमेव, कस्मात् ? **शिवमार्गविधेः** रत्नत्रयरूप-नियोगस्य, **विधानात्** करणात्, परं त्वं धाता=ब्रह्मा जडो[वेदोपदेशात् नरकमुदजीघटत्] न भवसि, हे **धीर** हे भगवन् श्री**आदिनाथ** ! **व्यक्तं** स्पष्टं यथा भवति [तथा], **पुरुषोत्तमः असि** वर्त्तसे,-पुरुषेषु उत्तमः पुरुषोत्तमः, परं त्वमेव-हरिः-शङ्ख-चक्र-गदाधारको-नाऽसि न-वर्त्तसे॥२५॥

**तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ !**
**तुभ्यं नमः क्षितितलामलभूषणाय ।**
**तुभ्यं नमस्त्रिजगतः परमेश्वराय**
**तुभ्यं नमो जिन ! भवोदधिशोषणाय ॥२६॥**

(२६) **अमर० अव० तुभ्यं०** [इति] हे जगन्नाथ ! [हे स्वामिन् ! **युगादिदेवः**] **तुभ्यं नमः** नमस्कारोऽस्तु, किंविशिष्टाय तुभ्यं ?-**त्रिभुवनार्त्तिहराय, त्रिभुवनस्य** भुवनत्रितयस्य, **आर्त्ति** दुःखं **हरति** इति त्रिभुवनाऽऽर्त्तिहरः, तस्मै त्रिभुवनार्त्तिहराय-जगत्पीडाऽपहाराय। हे **युगादिदेव**! पुनः- **तुभ्यं नमः**, किंविशिष्टाय तुभ्यं ?-**क्षितितलामलभूषणाय क्षितितले** पृथ्वीतले, [१]आ(अ)मलं निर्मलं भूषणं यः स-क्षितितलामलभूषणः, तस्मै क्षितितला-मलभूषणाय। हे युगादिदेव ! पुनः **तुभ्यं नमः**, किंविशिष्टाय तुभ्यं ? **त्रिजगतः** भुवनत्रयस्य, **परमेश्वराय** परमनायकाय, हे **जिन** ! [वीतराग] **तुभ्यं नमः**, किंविशिष्टाय तुभ्यं ? **भवोदधिशोषणाय,** भवोदधिः संसारसमुद्रः, तस्य [२]शोषणः, तस्मै भवोदधिशोषणाय ॥२६॥

**को विस्मयोऽत्र यदि नाम गुणैरशेषैस्-**
**त्वं संश्रितो निरवकाशतया मुनीश !।**
**दोषैरुपात्तविबुधाश्रयजातगर्वैः**
**स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ॥२७॥**

( २७ ) **अमर० अव० को वि०** [इति] हे **मुनीश**! मुनीनामीशः, स्वामी, मुनीशः तस्य संबोधनं क्रियते-हे मुनीश ! तपोधननायक !, **नाम** इति सत्यम्, **यदि त्वं**

१. आ समन्तात् अमलं इति आमलं इत्यपि बोध्यम्।

२. भवोद्धेः संसारसमुद्रस्य शोषणं येन स-भवोदधिशोषणः-[पा० २, को०] ॥

**अशेषैः** समग्रैः समस्तै **र्गुणैः संश्रितः** [1]आश्रितः सेवितोऽसि, **अत्र को विस्मयः** ? क आश्चर्यः ? न आश्चर्यम्, कया ? **निरव-काशतया** (निबिडतया) निबिडभावेन, हे युगादिदेव ! **दोषैः कदाचिदपि स्वप्नान्तरेऽपि न ईक्षितोऽसि**- न दृष्टोऽसि, किंविशिष्टैः दोषैः ?-**उपात्त-विबुधाश्रयजातगर्वैः, उपात्ताः** विडम्बिताः, ये **विबुधा** हरि-हरादयो देवाः, तेषां **आश्रयेण, जात** उत्पन्नो, **गर्वो** येषां ते - उपात्तविबुधाश्रयजातगर्वाः, तैः उपात्तविबुधाश्रयजातगर्वैर्नानाविधा-श्रयोत्पन्नमदैः, ईदृग्विधैर्दोषैस्त्वं **स्वप्ना-न्तरेऽपि न** दृष्टः न विलोकितः ॥२७॥

**उच्चैरशोकतरुसंश्रितमुन्मयूख-**
**माभाति रूपममलं भवतो नितान्तम् ।**
**स्पष्टोल्लसत्किरणस्ततमोवितानं**
**बिम्बं रवेरिव पयोधरपार्श्ववर्ति ॥२८॥**

**( २८ ) अमर० अव० उच्चैः०** [इति] हे **युगादिदेव** ! **भवतस्तव, अमलं** निर्मलं, **रूपं आभाति** शोभते, किंविशिष्टं रूपं ?-**उच्चैरशोक-तरुसंश्रि[तम्]-उच्चै**रुन्नतो योऽसौ **अशोकतरुः** अशोकवृक्षः, तत्र **संश्रितं** [2]आश्रितं यस्य(यत्) तद्-उच्चैरशोकतरुसंश्रितम्, पुनः किंविशिष्टं रूपम् ?-**उन्मयूखं**-उत् उद्ध्र्वं, **मयूखा** किरणाः यस्य तत्, उद्ध्र्वकिरणसमूहं जात्य-रत्नवत् यस्य तत् उन्मूखम् । तत् रूपं किमिव ?-रवेः श्रीसूर्यस्य, **बिम्बं** मण्डलमिव, किंविशिष्टं रवेः बिम्बं ?-**स्पष्टोल्लसत्किरणं-स्पष्टं** प्रकटं यथा

---

१. 'आश्रितः, कया ?-निरवकाशतया निबिडतया निबिडभावेन, अत्र को विस्मयः आश्चर्यम्-हे युगादि०- एवमत्राप्यन्वयस्य भेदः- [पा० २, को०] ॥

२. भावे क्त प्रत्ययोऽ यमिति मत्वा आश्रय इत्यर्थोऽवबोद्ध्यः ।

भवति एव**मुल्लसन्तः किरणाः** यस्य तत्-स्पष्टोल्लसत्किरणम् । पुनः किंविशिष्टं रवेः बिम्बम् ?-**अस्ततमोवितानम्-अस्तं** निराकृतं, **तमोवितानं** अन्धकारवृन्दं येन तत्-अस्ततमोवितानम् । पुनः किंविशिष्टं रवेः बिम्बम् ?-**पयोधरपार्श्ववर्त्ति** पयोधरपार्श्वे मेघसमीपे **वर्त्तते** इत्येवंशीलं यत्, तत् पयोधर-पार्श्ववर्त्ति, उत्प्रेक्षते-रूपं रविबिम्बमिव, कथंभूतस्य **रवेः** ? पयोधर-पार्श्ववर्त्ति-[नः] मेघसमीपवर्त्तिनः, कथंभूतं रवेः बिम्बम् ?-उन्मयूखं, नितान्तममलं, पुनः स्पष्टोल्लसत्किरणं, पुनः [अस्त]तमोवितानम्-एतानि विशेषणानि ॥२८॥

**सिंहासने मणिमयूखशिखाविचित्रे**
**विभ्राजते तव वपुः कनकावदातम् ।**
**बिम्बं वियद्विलसदंशुलतावितानं**
**तुङ्गोदयाद्रिशिरसीव सहस्त्ररश्मेः ॥२९॥**

**(२९) अमर० अव०** हे **युगादिदेव** ! **ते** तव, **वपुः** शरीरं, **सिंहासने विभ्राजते** शोभते, किं विशिष्टे सिंहासने ?-**मणिमयूखाशिखाविचित्रे-मणीनां** [१]रत्नानां, **मयूखाः** किरि(=र)णाः, तेषां **शिखाभिः** ज्योतिःप्ररोहैः, **विचित्रं** मनोज्ञंनानाप्रकारं वा यत्, तत् मणिमयूखशिखाविचित्रं, तस्मिन् [मणिमयूखशिखाविचित्रे], किंविशिष्टं वपुः ?-**कनकावदातम्** कनकवत्, स्वर्णवत् **अवदातं** गौरं यत् तत् कनकाऽवदातम्, तव वपुः शरीरं किमिव ?-**तुङ्गोदयाद्रिशिरसि**-उच्चोदयाचलशीर्षे, **सहस्त्ररश्मेः** श्रीसूर्यस्य, **बिम्बमिव** [मण्डलमिव] यथा [उदयाचलशृङ्गे] सहस्त्ररश्मेः सूर्यस्य बिम्बं राजते शोभते,

१. रत्नानां या मयूखशिखाः किरणाग्रभागाः, ताभिः विचित्रम् इत्यत्र पा० २, को० प्रतिद्वये समास-शैलीभेदः ।

तथा तव वपुः सिंहासने शोभते, किंविशिष्टं बिम्बं ? **वियति** आकाशे, **विलसन्तो** ये **अंशवः** किरणाः, तेषां **लतावितानं** मालावृन्दं यस्य तत्-वियद्विलसदंशुलतावितानम् ॥२९॥

**कुन्दावदातचलचामरचारुशोभं**
**विभ्राजते तव वपुः कलधौतकान्तम् ।**
**उद्यच्छशाङ्कशुचिनिर्झरवारिधार-**
**मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥३०॥**

**( ३० ) अमर० अव० कुन्दावदात०** इति - हे **युगादिदेव** ! **तव** वपुः शरीरं, **विभ्राजते** शोभते, किंविशिष्टं तव वपुः ?-**कुन्दावदातचलचामर-चारुशोभम्-कुन्दावदाताभ्यां** कुन्दपुष्पोज्ज्वलाभ्यां एवंविधाभ्यां, **चल-चामराभ्यां, चार्वी** मनोहरा, **शोभा** यस्य तत्-कुन्दावदातचलचामर-चारुशोभम् । पुनः किंविशिष्टं तव वपुः ?-**कलधौतकान्तम्-कलधौतवत्** स्व(सु)र्णवत्, **कान्तं** [चारु] मनोहरं जातरूपसदृशं यत् तत् कलधौतकान्तम् । तव वपुः शरीरं क(कि)मिव ?-**सुरगिरेर्मेरुपर्वतस्य शातकौम्भं** सौवर्णं, **उच्चैस्तटमिव,** यथा सुरगिरेः शातकौम्भं सौवर्णं उच्चैः उन्नतं, तटं शिखरं विभ्राजते, उच्चैस्तटं [किंविशिष्टं ?]-**उद्यच्छशाङ्कशुचिनिर्झरवारिधारम्** उद्यच्छशाङ्कवत् उदय-शालिचन्द्रवत् शुचिनिर्झरवारिधारा यस्य तत्-उद्यच्छशाङ्कशुचिनिर्झरवारिधारम्-उदयमानचन्द्रपवित्रज्योत्स्ना इव वारिधार(रा)सहितम् ॥३०॥

**छत्रत्रयं तव विभाति शशाङ्ककान्त-**
**मुच्चैः स्थितं स्थगितभानुकरप्रतापम् ।**

**मुक्ताफलप्रकरजालविवृद्धशोभं**

**प्रख्यापयत् त्रिजगतः परमेश्वरत्वम् ॥३१॥**

**( ३१ ) अमर० अव० छत्र०** [इति] हे पवित्रच(चा)रित्र ! **तव छत्रत्रयं विभ्राजते** शोभते, किंविशिष्टं छत्रत्रयं ?-**शशाङ्ककान्तम्**-[शशाङ्कवत्] चन्द्रवत् [कान्तं] रमणीयम् [मनोज्ञम्] । पुनः किंविशिष्टं छत्रत्रयम् ?-**उच्चैः स्थितं** उन्नतं मूर्ध्नि स्थितम् । पुनः किंविशिष्टं छत्रत्रयम् ?-**स्थगितभानुकर-प्रतापम्**-स्थगित आच्छादितः, **भानुकराणां** सूर्यकिरणानां, प्रकृष्टः तापो येन तत्-स्थगितभानुकरप्रतापम् । पुनः किंविशिष्टं छत्रत्रयं ? **मुक्ताफलप्रकर-जालविवृद्धशोभम्**- मुक्ताफलप्रकरजालैः मौक्तिकसमूहरचनाविशेषैः [**विवृद्धा**] विवर्धिता वृद्धिंनीता, **शोभा** यस्य तत् मुक्ताफलप्रकर-जालविवृद्धशोभम् । तत् छत्रत्रयं [किं कुर्वत् ?- ] **त्रिजगतो** भुवनत्रयस्य, **परमेश्वरत्वं** [परमैश्वर्यं] परमस्वामित्वं, **प्रख्यापयत्** कथयत् [निरूपयत्] ॥३१॥

**उन्निद्रहेमनवपङ्कजपुञ्जकान्ति-**

**पर्युल्लसन्नखमयूखशिखाभिरामौ ।**

**पादौ पदानि तव यत्र जिनेन्द्र ! धत्तः**

**पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥३२॥**

**( ३२ ) अमर० अव० उन्निद्र०** [इति] हे **जिनेन्द्र** ! **यत्र** भूमौ, **तव पादौ पदानि धत्तः**, **तत्र** स्थाने **विबुधाः** देवाः, **पद्मानि** कमलानि **परि-कल्पयन्ति** [स्वयं मण्डयति] रचयन्ति, किंविशिष्टौ पादौ ?-**उन्निद्रहेम-**

**नवपङ्कजपुञ्जकान्तिपर्युल्लसन्नखमयुखशिखाऽभिरामौ । उन्निद्राणि** विक-शितानि, **हेम्नः** स्वर्णस्य, यानि **नवसङ्ख्याकानि, पङ्कजानि** कमलानि, तेषां, **पुञ्जं** वृन्दं, तस्य **कान्त्या पर्युल्लसन्ती** समन्तादुच्छलन्ती या, **नख-मयूखशिखा,** तया **अभिरामौ** मनोज्ञौ यौ तौ-उन्निद्रहेमनवपङ्कजपुञ्ज-कान्तिपर्युल्लसन्नखमयूखशिखाऽभिरामौ ॥३२॥

**इत्थं यथा तव विभूतिरभूज्जिनेन्द्र !**
**धर्मोपदेशनविधौ न तथा परस्य ।**
**यादृक् प्रभा दिनकृतः प्रहतान्धकारा**
**तादृक् कुतो ग्रहगणस्य विकाशिनोऽपि ? ॥३३॥**

**( ३३ ) अमर० अव० इत्थं यथा०** [इति] [दे] **जिनेद्र** ! **युगादि-देव** !, **इत्थं** अमुना पूर्वोक्त प्रकारेण, **यथा तव विभूतिरभूत्** बभूव, क्व ?- **धर्मोपदेशनविधौ**-धर्मोपदेशकर्त्तव्ये, **तथा अपरस्य** हरि-हरादेः, **एवं**विधा विभूति**र्ना**ऽभूत् न बभूव, दृष्टान्तमाह-**दिनकृतः** सूर्यस्य, **प्रहतान्धकारा यादृक् प्रभा** भवति, **ग्रहगणस्य=मङ्गल-बुध-बृहस्पत्यादेः तादृक्** प्रभा, **कुतो-ऽपि,** अपि तु न कुतोऽपि, किंविशिष्टस्य ग्रहगणस्य ? **विकाशिनः** विकाश उद्योतो यस्य स (अस्ति अस्य) विकाशी, तस्य विकाशिनः ॥३३॥

**श्च्योतन्मदाविल-विलोल-कपोलमूल-**
**मत्तभ्रमद्भ्रमरनादविवृद्धकोपम् ।**
**ऐरावताभमिभमुद्धतमापतन्तं**
**दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥३४॥**

(३४) **अमर० अव०** [श्रीमानतुङ्गाचार्या **भक्तामरस्तोत्रस्य** माहात्म्यमाहुः]-**श्च्योतन्०** [इति]-हे जिनेन्द्र ! [१]**भवदाश्रितानां तवाराधन-तत्पराणां** [पुरुषाणां जनानां लोकानां] **इभं** गजं, **आपतन्तं** आगच्छन्तं, **दृष्ट्वा भयं न भवति,** किंविशिष्टं इभं हस्तिनम् ? **श्च्योतन्मदाविल-विलोल-कपोलमूलमत्त-भ्रमद्-भ्रमरनादविवृद्धकोपम्**-ग(क)ण्डू (२) चक्षुषी (२) करो (१) मेंढ्र (१) गुदम् (७) इति सप्तस्थानेषु **श्च्योतता** क्षर(ता), **मदेन,** अ**विलं** (आविलं) कलुषं, [**विलोलं**] चञ्चलं, **कपोलमूलं,** तत्र **मत्ता भ्रमन्तो** ये **भ्रमराः,** तेषां **नादो**[दः, तेन] **विवृद्धो** वृर्द्धिनीतः,

**कोपो** येन स श्च्योतन्मदाविल-विलोल-कपोलमूल-मत्त-भ्रमद्भ्रमरनाद-विवृद्धशोभः । तं-श्च्योतन् [मदा-विल-विलोल-कपोलमूलमत्त-भ्रमद्भ्रमर-नादविवृद्धशोभम्] -तथा क्षरन्मदकलुषचञ्चल-गल्लस्थलमूलमत्ता मदान्धा भ्रमणशीला भ्रमरा [तेषां] नादाः, तैः विशेषै वर्धितरोषम् । पुनः किंविशिष्टं इभं ? **ऐरावताऽऽभम्** [ऐरावणतुल्यं] इन्द्रगजराजसदृशम् । पुनः किंविशिष्टं इभम् ?-**उद्धतम्** क्रोधेन उत्कटं प्रचण्डम् ॥३४॥

**भिन्नेभकुम्भगलदुज्ज्वलशोणिताक्त-**
**मुक्ताफलप्रकरभूषितभूमिभागः ।**
**बद्धक्रमः क्रमगतं हरिणाधिपोऽपि**
**नाक्रामति क्रमयुगाचलसंश्रितं ते ॥३५॥**

१. अत्रैवमन्वयभेदो यथा श्यो० इभं हस्तिनं आपन्ततं आगच्छन्तं-दृष्ट्वा भवदा-श्रितानां इति [पा० २, को प्रतौ] ।

**( ३५ ) अमर० अव० भिन्नेभ०** [इति] हे जगन्नाथ ! **ते** तव, **क्रम-युगाचलसंश्रितम्** चरणयुगलसंश्रितम्, पुरुषम्, **हरिणाधिपोऽपि** सिंहोऽपि, **नाऽऽक्रामति,** न गृह्णाति ग्रहणाय उद्यमो (तो) न भवति, **क्रमयुगं** पादयुगमेवाचलः पर्वतः, तत्र संश्रितं [आश्रितम्] क्रमयुगाचलसंश्रितम्, किंविशिष्टो हरिणाधिपः ? **भिन्नेभकुम्भगलदुज्ज्वलशोणिताक्तमुक्ता-फलप्रकरभूषितभूमिभागः-भिन्नाभ्यां** विदारिताभ्यां, **इभकुम्भाभ्यां** गजशिरःपिण्डाभ्यां, **गलता** पतता, **उज्ज्वलेन शोणिताक्तेन** रुधिरव्याप्तेन एवंविध**मुक्ता-फलप्रकरेण** मौक्तिकसमूहेन, **विभूषितो भूमिभागो** येन स-भिन्नेभकुम्भगलदुज्ज्वल-शोणिताक्त-मुक्ताफलप्रकरभूषितभूमिभागः, तथा विदारितगजकुम्भ-पतदुज्ज्वल-रुधिराक्त-मौक्तिकसमूहैरलङ्कृतपृथ्वीपीठः । पुनः किंविशिष्टः हरिणाधिपः ?-**बद्धक्रमः** बद्धः क्रमः फाला येन स बद्धक्रमः, अथवा बद्धा कीलिता, क्रमा पादविक्षेपा यस्य स बद्धक्रमः, किंविशिष्टं क्रमयुगाचलसंश्रितम् ? [**क्रम**] **गतं** फ(फा)ल-प्राप्तं **क्रमेषु** चतुर्ष्वपि पादेषु, **गतः** प्राप्तः [क्रमगतः तं] क्रमगतम् तथा किंविशिष्टं पुरुषं, क्रमगतं-चरणाग्रे आगतानां(आगतम्) निक[ट]वर्ती भवति ॥३५॥

**कल्पान्तकालपवनोद्धुतवह्निकल्पं**
**दावानलं ज्वलितमुज्ज्वलमुत्फुलिङ्गम् ।**
**विश्वं जिघत्सुमिव सम्मुखमापतन्तं**
**त्वन्नामकीर्तनजलं शमयत्यशेषम् ॥३६॥**

**( ३६ ) अमर० अव० कल्पां०** [इति] उक्तं मृगारिवशीकरणमन्त्रम्,

इदानीं-दावानलस्तम्भनमन्त्रमाह-अथ दावानलभयं प्रयाति-

हे **युगादिदेव** ! **त्वन्नाम कीर्त्ति( र्त्त )-नजलं** त्वन्नामवर्णनजलम्, **अशेषं दावानलं शमयति** उपशमयति, किंविशिष्टं दावानलम् ?-**कल्पान्त-कालपवनोद्धुतवह्निकल्पम्-** कल्पान्तकालपवनेन प्रलयकालवायुना-उद्ध(धु)त उच्छालितो, **वह्निः** उत्पादिताग्निः, तेन कल्पः समः तुल्यः सदृशो यः स कल्पान्त-कालपवनोद्धुतवह्निकल्पः, तं तथोक्तं, पुनः किंविशिष्टं दावानलम् ?-**ज्वलितं** दीप्तं ज्वलनशीलम्, पुनः किंविशिष्टं दावानलम् ?-**उज्ज्वलं** ज्वालारक्तम्, पुनः किंविशिष्टं दावानलम् ?-**उत्फुलिङ्गम्** उद् उर्ध्वं फुल्लिङ्गाः अग्निकणाः यस्य स उत्फुलिङ्गः, तं उत्फुलिङ्गम्, दावानलं किं कुर्वन्तमिव ?

उत्प्रेक्षते-**विश्वं** जगत्, जिघृ(घ)त्सुमिव भक्षयितुमिव ग्रसितुमिव [इच्छुं], पुनः किंकुर्वन्तम्-दावानलम् ?-**सन्मुखमापतन्तम्** आगच्छन्तम् [आयान्तम्] ॥३६॥

**रक्तेक्षणं समदकोकिलकण्ठनीलं**
**क्रोधोद्धुतं फणिनमुत्फणमापतन्तम् ।**
**आक्रामति क्रमयुगेन निरस्तशङ्कस्-**
**त्वन्नामनागदमनी हृदि यस्य पुंसः ॥३७॥**

**( ३७ ) अमर० अव०** चतुर्थं सर्पभयच्छेदनमन्त्रगुप्तं काव्यमाह-

**रक्तेक्षणं०** [इति] फणिन-(नो)भयं निरस्यति-हे **युगादिदेव** ! **त्वन्नामनागदमनी यस्य पुंसः** पुरुषस्य, **हृदि** भवति त्वन्नामनागदमनी विषापहारिणी औषधी वर्त्तते, स पुरुषः **फणिनं** सर्पं, **आपतन्तम्** आगच्छन्तम्,

**आक्रामति** ग्रहणाय उद्यतो भवति, पुष्पमाल(ला)वद् गृह्णाति, किंविशिष्टं फणिनं ?-**रक्तेक्षणं** रक्ते ईक्षणे लोचने यस्य स रक्तेक्षणः, तं रक्तेक्षणम्, पुनः किंविशिष्टं सर्पम् ?-**समदकोकिलकण्ठनीलम्-समदः** समत्तो मदोन्मत्तो, योऽसौ **कोकिलकण्ठः**, तद्वत् **नीलः** कृष्णो यः-समदकोकिलकण्ठनीलः, तं समदकोकिलकण्ठनीलम्, पुनः किंविशिष्टं फणिनम् ? **क्रोधोद्धु( ध )तम्** क्रोधेन कोपेन उत्कण्ठः स-क्रोधः, क्रोधोद्धु-(ध)तः, तम्, (पुनः किंविशिष्टं फणिनं ?-**उत्फणं** उत् ऊर्ध्वः फणा यस्य स-उत्फणः, तम् उत्फणम्, किंविशिष्टः पुरुषः ? **निरस्तशङ्कः** निरस्ता गता, शङ्का भयं यस्मात् स निरस्तशङ्कः, केन ? **क्रमयुगेन** वीतरागचरणयुग्मेन ॥३७॥

**वल्गत्तुरङ्ग-गजगर्जितभीमनाद-**
**माजौ बलं बलवतामपि भूपतीनाम् ।**
**उद्यद्दिवाकरमयूखशिखापविद्धं**
**त्वत्कीर्तनात् तम इवाशु भिदामुपैति ॥३८॥**

**( ३८ ) अमर० अव० वल्गत्तुरङ्ग०** [इति] हे देवाधिदेव ! **बलवतामपि** बलिष्ठानामपि, **भूपतीनां** नरेश्वराणां, **बलं** सैन्यं, **आजौ** संग्रामे, **आशु** शीघ्रं, **भिदामुपैति** विनाशं गच्छति, भेदं याति, कस्मात् ! **त्वत्-कीर्तनात्**-त्वन्नामग्रहणात् त्वन्नामस्मरणात्, कथं यथा भवति-तथा, किंविशिष्टं बलं ? **वल्गत्तुरङ्ग-गजगर्जित-भीमनादं** यथा भवति, **वल्गतां** धावतां, **तुरङ्गमानां** च **गजानां** च **गर्जितानि भीमनादा** घोरवीर-सिंहनादाश्च यत्र तत् वल्गत् तुरङ्ग-गज-गर्जितभीमनादम्, तद्बलं किमिव ?-**तम इव** अन्धकार(रं) इव, यथा

तमोऽन्धकारं, **उद्यद्दिवाकरमयूख-शिखाऽपविद्धं,** तत् **आशु** शीघ्रं भिदानं(भिदां) विनाशं **उपैति** प्रलयं याति, उद्योतो (उद्यन्) यो दिवाकरः, तस्य श्रीसूर्यस्य किरणाः [उद्यन्तो ये दिवाकरमयूखाः] तेषां शिखाभिरपविद्धं विनाशितं यत् तत् - उद्यद्दिवाकर-मयूखशिखाऽपविद्धं, यथा दिवाकरकिरणैः तमो निर्नाश्यते तथा त्वत्कीर्त्तनात् बलमपि ॥३८॥

**कुन्ताग्रभिन्नगजशोणितवारिवाह-**
**वेगावतारतरणातुरयोधभीमे ।**
**युद्धे जयं विजितदुर्जयजेयपक्षास्-**
**त्वत्पादपङ्कजवनाश्रयिणो लभन्ते ॥३९॥**

**( ३९ ) अमर० अव० कुन्ताग्र०** [इति] हे जिनेश्वर ! हे सर्वज्ञ ! **त्वत्पादपङ्कजवनाऽऽश्रयणाः( श्रयिणो )** त्वत्पादपद्मप्रभायो(जो) नरा मनुष्याः, **युद्धे** रणे, **जयं** विजयं, **लभन्ते** प्राप्नुवन्ति, किंविशिष्टे युद्धे ?- **कुन्ताग्रभिन्नगजशोणित-वारिवाहवेगावतारतरु( र )णातुरयोधभीमे** कुन्ताग्रैर्भल्लाग्रैः भिन्नानां गजानां शोणित-मेव(रुधिरमेव)वारिवाहो जलप्रवाहः मेघप्रवाहः, तस्य वेगावतारतरणे[तरणेन] आतुराः व्याकुलाः योद्धाः-(धाः) सुभटाः, **तैर्भीमं** रौद्रं यत् तत्-कुन्ताग्रभिन्नगजशोणित-[वारिवाहवेगावतार-तरणातुर] योधभीमम्, तस्मिन्-कुन्ताग्रभिन्न०....योधभीमे । किंविशिष्टाः त्वत्पादपङ्कजवनाश्रय(यि)णो नराः ?-**विजितदुर्जयजेय-पक्षाः**-विजितः पराभूतो, दुर्जयानां शत्रूणां यो जेतव्यपक्षो यैस्ते विजित-दुर्जयजेयपक्षाः ॥३९॥

**अम्भोनिधौ क्षुभितभीषणनक्रचक्र-**
**पाठीनपीठभयदोल्बणवाडवाग्नौ ।**

**रङ्गत्तरङ्गशिखरस्थितयानपात्रास्-**

**त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ॥४०॥**

**( ४० ) अमर० अव० अम्भोनिधौ०** [इति] हे जिनेन्द्र ! संसार-समुद्रतारक ! सांयात्रिकाः प्रवहणवणिजो नराः, **अम्भोनिधौ** समुद्रे, **त्रासं विहाय** परित्यज्य, भवतः **स्मरणात्** तव वीतराग ! नामग्रहणात्, **व्रजन्ति** कुशलेन स्वस्थानं यान्ति, किंविशिष्टे अम्भोनिधौ ?-**क्षुभितभीषणनक्रचक्र-पाठीन-पीठ-भयदोल्बणवाडवाग्नौ-क्षुभिताः** क्षोभं गताः, [**भीषणाः**] बिभीषणाः रौद्राः ये, **नक्रचक्राः** जलचरसमूहाश्च **पाठीन-पीठाद्या**(पीठानि) मत्स्य-कूर्मविशेषाश्च भयदोल्बणश्च भयदायकोत्कटश्च एवंविधो **वाडवाग्निः** वडवानलो यत्र स-क्षुभितभीषणनक्रचक्र-पाठीन-पीठ-भयदोल्बणवाडवाग्निः [तस्मिन्]-क्षुभित.....वाडवाग्नौ, किंविशिष्टः सांयात्रिकाः पोतवणिजो नराः ?-**रङ्गत्तरङ्गशिखरस्थितयानपात्राः- रङ्गन्त** उल्लसन्तो ये, **तरङ्गाः**, तेषां **शिखरेषु** अग्रेषु, **स्थितं यानपात्रं** प्रवहणं येषां ते-रङ्गत्-तरङ्गशिखरस्थितयानपात्राः ॥४०॥

**उद्भूतभीषणजलोदरभारभुग्नाः**

**शोच्यां दशामुपगताश्च्युतजीविताशाः ।**

**त्वत्पादपङ्कजरजोऽमृतदिग्धदेहा**

**मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥४१॥**

**( ४१ ) अमर० अव० उद्भूत०** [इति] हे जिनेन्द्र ! **मर्त्याः** मनुष्याः, **मकरध्वज-तुल्यरूपाः** कन्दर्पसमानरूपा **भवन्ति**, मकरध्वजतुल्यं रूपं येषां

ते-मकरध्वजतुल्यरूपाः, किंविशिष्टाः मनुष्याः ?-**उद्भूतभीषणजलोदर-भारभु( भ )ग्नाः-उद्भूतेन** उत्पन्नेन, **भीषणेन** रौद्रेण **जलोदरभारेण** जलो-दरनामरोगभारेण, भु(भ)ग्नाः नम्राः वक्रीभूता ये ते - उद्भूतभीषण-जलोदर-भारभु(भ)ग्नाः, पुनः किंविशिष्टाः मर्त्याः ? **शोच्यां दशां उपगताः** शोच-नीयावस्थां निन्दनीयदशां संप्राप्ताः, पुनः किंविशिष्टाः मर्त्याः ?-**च्युत-जीविताशाः** च्युता भ्रष्टा, [**जीविते**] जीवितव्ये आशा येषां ते च्युत-जीविताशाः मरणावस्थां प्राप्ताः, पुनः किंविशिष्टाः मर्त्याः ?-**त्वत्पादपङ्क-जरजोऽमृतदिग्धदेहाः**- त्वत्पादपङ्कजरजो[ऽमृतेन] त्वत्पादकमल-[किंजल्का]ऽमृतेन, दिग्धं व्याप्तं देहं येषां ते-त्वत्पादपङ्कजरजोऽमृत-दिग्धदेहाः-तव चरणकमलरेणुरेखामृतं, तेन लिप्तशरीराः, यथाऽमृतेन नवीनं वपु र्जायते तथैव ॥४१॥

**आपादकण्ठमुरुशृङ्खलवेष्टिताङ्गा**
**गाढं बृहन्निगडकोटिनिघृष्टजङ्घाः ।**
**त्वन्नाममन्त्रमनिशं मनुजाः स्मरन्तः**
**सद्यः स्वयं विगतबन्धभया भवन्ति ॥४२।?**

( ४२ ) **अमर० अव० आपाद०** [इति] हे जिनेन्द्र ! हे **आदिदेव** ! **मनुजा** मनुष्याः, **अनिशं** निरन्तरं, **त्वन्नाममन्त्रं स्मरन्तः** [सन्तः] **सद्यस्त**-त्कालं, **स्वयं** स्वयमेव आत्मना, **विगतबन्धभया**-निगडबन्धनभयात् गतबन्धनभया भवन्ति तुटितबन्धना भवन्ति, किंविशिष्टाः मनुजाः [१]**उरु-शृङ्खलवेष्टिताङ्गाः** कथं ? आपादकण्ठं यावत्-**आपादकण्ठं** आ

१. [उरुशृङ्खलैर्महाभारसंयुक्तशृङ्खलैर्वेष्टितं अङ्गम् येषां ते] इति विग्रहवाक्यम्, पा० २। को प्रत्योः ॥

मर्यादीकृत्य, पुनः किंविशिष्टाः मनुजाः ? **गाढं बृहन्निगडकोटिनिघृष्ट-जङ्घा-गाढं** निग(बि)डं **बृहतीभिः निगडकोटिभिः** अष्टील(अष्टलका)-कोटिभिः अत्यर्थं प्रौढलोहमय-दण्डिकाग्रैर्नितरामतिशयेन[घृष्टा]घृष्टता (घर्षिता) कदर्थिता जङ्घा येषां ते-गाढं बृहन्निगडकोटिनिघृष्टजङ्घाः ॥४२॥

**मत्तद्विपेन्द्र-मृगराज-दवानला-हि-**
**सङ्ग्राम-वारिधि-महोदर-बन्धनोत्थम्।**
**तस्याशु नाशमुपयाति भयं भियेव**
**यस्तावकं स्तवमिमं मतिमानधीते ॥४३॥**

**(४३) अमर० अव० मत्तद्वि०** [इति] हे जिनेन्द्र ! **यो मतिमान्** पुरुषः, **इमं तावकं** त्वदीयं, **स्तवनं** स्तोत्रं 'भक्ताऽमरा'ऽभिधानं, **अधीते** पठति, तस्य किं भवति ? कविराह-**तस्य** पुरुषस्य, **आशु** शीघ्रं, **भयं भियेव** भयेनेव, **नाशमुपयाति** विध्वंसं गच्छति, किंविशिष्टं भयं ?-मत्तद्विपेन्द्र-मृगराज-दवानला-ऽहि-संग्राम-वारिधि-महोदर-बन्धनोत्थम्,-मत्तद्विपेन्द्रश्च मृगराजश्च दवानलश्च अहिश्च संग्रामश्च वारिधिश्च महोदरश्च (जलोदररोगश्च) बन्धनं च-, तेभ्य(उत्था)उत्पत्तिर्यस्य तत्-मत्तद्विपेन्द्र-मृगराज-दवानला-ऽहि-संग्राम-महोदर-बन्धनोत्थम्, मत्तो मदोन्मत्तो गजेन्द्रः, मृगारिः सिंहः, दवानलोऽग्निः, अहिः सर्पः, संग्रामो रणाङ्गणं, वारिधिः समुद्रः, महोदरो जलोदरो, बन्धनं निगडादि-एतैः पूर्वोक्तैरष्टभिः प्रकारैः, उत्पन्नं एवंविधमपि भयं, अनेन पठितेन, नाशं याति, न संशयः ॥४३॥

**स्तोत्रस्रजं तव जिनेन्द्र ! गुणैर्निबद्धां**
**भक्त्या मया रुचिरवर्णविचित्रपुष्पाम्।**

**धत्ते जनो य इह कण्ठगतामजस्त्रं**

**तं 'मानतुङ्ग 'मवशा समुपैति लक्ष्मीः ॥४४॥**

**(४४) अमर० अव० स्तोत्रस्त्र०** [इति] हे **जिनेन्द्र ! यो जनो** लोकः, इह संसारे, **स्तोत्रस्त्रजं** स्तोत्रमालां, **अजस्त्रं** निरन्तरं, **कण्ठगतां धत्ते** धारयति, **अवशा** वशरहिता, **लक्ष्मीः, तं** पाठकं **समुपैति** उपैति, किंविशिष्टं तं पुरुषं ?-

**मानतुङ्गं** मानेन तुङ्गः उच्चैस्तरो मानतुङ्गः, तम् मानतुङ्गम्, तथा कविना अत्र स्वनामधेयमपि सूचितं संचारितम्, किंविशिष्टां स्तोत्रस्त्रजं ?-**मया भक्त्या निबद्धां** गुंभि(फि)ताम्, कैः ? **तव गुणैः**, पुनः किंविशिष्टां स्तोत्रस्त्रजम् ?-**रुचि[ र ]वर्णविचित्रपुष्पाम्-रूचिरा** मनोहरा, **वर्णा** अक्षराणिः विचित्रं-(त्राणि) पुष्पाणि यस्याः सा-रुचिरवर्णविचित्रपुष्पा, ताम् रुचिर-वर्ण-विचित्रपुष्पाम् ॥४४॥

---

[प्रतित्रिकस्य पुष्पिकाः]-

श्री**अमरप्रभ**सूरीणाः वैदुष्यगुणभूषिताः

भक्तामरस्तववी(वि)वृत्तिमकार्षुः सुखबोधिकाम् ॥१॥

रीत्यभङ्गोऽन्वयभङ्गः समासः वृत्तयः(व्यत्ययः) क्वचित्।

कथितो विपरीतार्थो विबुधैः शोध्यतामियम् ॥२॥

१. इति **श्रीभक्तामरस्तोत्रस्यावचूरि**समत्तं, शुभम्।

---

संवत् १८८१ मि० माघवदि २, मंगलवारे, श्री १०८ मत्पूज्याचार्य-**बिमलचंद**-स्वामीजी, तेषां शिष्य श्री१०८ मत्पूज्याचार्य **रामचन्द्र**स्वामीजी, तेषां

लघुभ्राता **बिहारी-ऋषिणा,** इयं भक्तामरस्तवटीका लिपीकृता, विबुधैः शोध्यतां ममोपरि कृपां कृत्वा, शुभम्, **सढोरा** नगरे॥

२. साधुश्रीवाचनाचार्य **देवसुन्दर**सद्‌यतेः।

तस्याभ्यर्थनतोप्येवं गुण**रत्नमहो**दधेः ॥२॥ इति पद्‌मधिकं

पा- प्रतौ पुष्पिकाचेत्थं इति श्रीभक्तामरस्तोत्रस्य **सुखबोधिका** टीका॥

को - प्रतस्य पुष्पिकेयम् यथा -

३. श्री अमरप्रभसूरीशा वैदुष्येण भूषिता

भक्तामरस्तवीवृत्तिमकार्षुः सुखबोधिका(म्) ॥१॥ इति श्रीभक्तामर स्तवटीका समाप्तम् ॥१॥ संवत १९११, लीषतं परमसावैरुलव **झूंझण**मधो॥ शेठ **नथमल**वारमले।

पं.श्री विज्ञानप्रभविजयगणीवराः
पू.आ.श्रीविजयकेसरसू.म.समुदायगच्छः
पू.आ.श्रीहेमप्रभसूरिणां शिष्यः

## देवविजयकृत

## श्रीअर्हन्नामसहस्रसमुच्चयः

परम पूज्य श्री विजयसेनसूरीश्वरजीना समयमां (राज्यमां महोपाध्याय श्री मुनिविजयगणिना शिष्य पंडितश्री देवविजय गणिअे आ स्तोत्र रच्युं छे।)

परमात्माना अतिअद्‌भूत चिंतनीय अेवा १००८ विशेषणो होवाथी आ स्तोत्रनुं नाम श्री अर्हन्नामसहस्रसमुच्चय अेवुं राखेल छे। आ स्तोत्रमां १० अधिकार छे। दशेय अधिकारमां १००-१०० नामो छे अने छेल्ला अधिकारमां १०० नामो थया पछी आठ नामोनुं अेक अष्टक आपेल छे तेथी १००८ नाम थाय छे। १० अधिकारमां कुल १४१ श्लोको छे।

| | |
|---|---|
| १ला अधिकारमां १४ श्लोक | २जा अधिकारमां ११ श्लोक |
| ३जा अधिकारमां १३ श्लोक | ४था अधिकारमां १२ श्लोक |
| ५मां अधिकारमां १४ श्लोक | ६ठ्ठा अधिकारमां १४ श्लोक |
| ७मां अधिकारमां १५ श्लोक | ८मां अधिकारमां १५ श्लोक |
| ९मां अधिकारमां १५ श्लोक | १०मां अधिकारमां १४ श्लोक |

### (प्रथमं शतकम्)

प्रणम्य मगसीपार्श्वं, श्रीमन्तं महिमोदधिम् ।
कुर्वेऽहं कामितफलमर्हन्नामसहस्रकम् ॥१॥

सुप्रभावमिदं सम्यग्, जिनस्य जपतोऽन्वहम् ।
भवन्ति भूरयः सिद्धि-बुद्धि-ऋद्धि-समृद्धयः ॥२॥

ऐहिकामुष्मिक-शुभफलदानैकतत्परः।
जागरुकः प्रभावोऽत्र, स्तोत्रे मन्त्रपदान्विते ॥३॥

ॐकारः प्रथमः पुण्यः, परमात्माऽपरः परः ।
शम्भुः स्वयंभू र्भगवान्, वीतरागो जिनेश्वरः ।।४।।

जगदीशो जगत्पूज्यो, जगद्वंद्यो जगज्जयी ।
जगद्ध्येयो जगद्गेयो, जगन्मेयो जगत्पतिः ।।५।।

अनन्तदर्शनोऽनन्त-ज्ञानोऽनन्तसुखः शिवः ।
अनन्तवीर्योऽनन्तज्ञोऽनन्तात्मा शाश्वत-स्थितिः ।।६।।

सिद्धः साध्यः स्वयंबुद्धः, साधितार्थः परार्थकृत् ।
योगी योगविनिर्मुक्तस्त्यागी भोगी विरागवान् ।।७।।

सगुणो निर्गुणः शुद्धः, प्रबुद्धः सूक्ष्मविद्विभुः ।
निरञ्जनो निराकारो, निर्लेपो निरहङ्कृतिः ।।८।।

निर्ममो निर्मदो नित्यः, स्तुत्यः स्तोतव्यवर्जितः ।
निर्लोभो निःस्पृहो नीरुक्, निर्भयो निर्मलोऽकलः ।।९।।

परमेष्ठी परपदः, परमः परमावधि ।
चिन्मयोऽचिन्त्यचरितः, कृतकृत्यः कृपामयः ।।१०।।

अगम्यः शोभनः साधुः, सदानन्त-सनातनः ।
एकोऽनेको महातेजास्तपस्वी विजितेन्द्रियः ।।११।।

प्रकाशः प्रथितः पूतः, पावनः परमेश्वरः ।
हंसोऽर्हन् सुगतिर्जेता, नेता नाथोऽरतिः प्रभुः ।।१२।।

वीरो धीरः सितः शान्तः, शान्तिकृत् सुविधिर्जिनः ।
महाध्यानी महामानी, महाध्येता महाधृतिः ।।१३।।

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृति-तत्पराणां, भवन्तु भव्या विजयश्रियो द्राग् ।।१४।।

**इति श्री अर्हन्सहस्रनामसमुच्चये प्रथमं शतकम् ।।१।।**

## द्वितीयं शतकम्

क्षीणकर्मा महाकर्मा, सुधर्मा सर्ववत्सलः ।
अनुकूलः प्रतिकूलो, लब्धिमानरसो गुरुः ।।१।।

अरुपी रुपवान् सर्व-जनीनः केवली महान् ।
देववंद्यो महावीरो, महादेवो महोदयः ।।२।।

अधीश्वरः पारगतोऽनघोऽनर्ध्यो ऽसितोऽजितः ।
यथार्थवक्ता स्याद्वादी, सर्वज्ञः सर्वदर्शनः ।।३।।

चन्द्रप्रभो निष्प्रतिमः, प्रतिमाभृन्महोमयः ।
अव्यक्तो व्यक्तरुपोऽर्च्यः, प्रकृष्टः स्पष्टवाक् शुचिः ।।४।।

अगन्धोऽस्पर्शनः पीतो-रक्तोऽरक्तो गणाधिपः ।
महासिद्धि र्महावृद्धि-र्वर्धमानः प्रवर्द्धनः ।।५।।

अमूर्तो मूर्त्तिमान् मान्यो, महाभागो महामुनिः ।
अदोषो दीप्तिमान् दिव्यः, क्षमिता समतानिधिः ।।६।।

अयोगो रागभिद् भव्यः, श्रव्यो गव्यो गवांपतिः ।
अशरीरो जीवघनोऽनादिः, सादिरनङ्गजित् ।।७।।

महायशा जितरिपु, र्विघ्नहृत् प्रियदर्शनः ।
अयोनि र्योनिवित् सर्व-विद्यामूलं त्रिकालवित् ॥८॥

अबद्धो बोधिदो दाता, त्राता माता महापतिः ।
षट्कायरक्षको भाव-बान्धवो बुद्धिमान् क्षमः ॥९॥

कर्ता हर्ता पिता भर्ता, विधाता वञ्चकोऽरुचिः ।
आप्तो राजा जयी यन्ता, परंज्योति र्दिगम्बरः ॥१०॥

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृतितत्पराणां, भवन्तु भव्या विजयश्रियो द्राग् ॥११॥

**इति श्री अर्हन्सहस्रनाम-समुच्चये द्वितीयं शतकम् ॥२॥**

## तृतीयं शतकम्

देवाधिदेवो भवभिदभिनन्द्योऽभिनन्दनः ।
सुमतिः पद्मप्रभो भद्रस्तीर्थकृत् तीर्थसेवितः ॥१॥

ईशानः शङ्करः पञ्चवर्णोऽवर्णश्चतुर्मुखः ।
अनगारो व्रती विज्ञो, महिमाढ्यो महेशिता ॥२॥

भदन्तः सुव्रतोऽसङ्गः, प्रातिहार्ययुतोऽच्युतः ।
अनिन्दकः सातिशयोऽनङ्गकेतुस्त्रिवेदजित् ॥३॥

तमोपहो गतक्लेशः, सविता पुरुषोत्तमः ।
निर्नाथो नन्दनोऽलेश्यः, सेवनीयो मुनीश्वरः ॥४॥

हितोऽनाहारकोऽशब्दो, लिङ्गोऽसंज्ञी निरुत्सुकः ।
उदासीनः परब्रह्म-लीनोऽनुत्तररूपयुग् ।।५।।

अनाश्रवो महामायः, कामचारी कृतागमः ।
लोकालोकस्वरूपज्ञः, षट्पदार्थ-निवेदकः ।।६।।

लोकोद्योतकरो लोक-प्रदीपो लोकबोधकः ।
मृत्युञ्जयोऽभवोऽभीतो, ऽगतिर्गम्योऽतिशायिवाक् ।।७।।

अजन्माऽनुत्तमो दान्तः, सावधानो महोद्यमः ।
आत्मभूः श्रमणः श्रीमान्, लोकेशो लोकवल्लभः ।।८।।

अरहस्यः क्रियामुक्तः, पुरुषार्थप्रसाधकः ।
अनुत्तरगुणो गुण्यो, योगाऽष्टाङ्गनिषेवकः ।।९।।

सिद्धचक्रादिमध्येन्तः-कृतस्थानकसत्तपाः ।
अवेदोऽवेदनो विद्वान्, ब्रह्मा विष्णु र्महाव्रती ।।१०।।

पौरस्त्यशरणं लोकोत्तमाद्यः पूर्वमङ्गलम् ।
महाराजः पुराणज्ञोऽनेकनामा समाधिमान् ।।११।।

शरण्यः सर्वगो गुप्तो, मन्त्रतन्त्रमयोऽकलिः ।
अनध्ययनसङ्ख्यावान्, पूर्वाधीतश्रुतान्वितः ।।१२।।

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृतितत्पराणां भवन्तु भव्या विजयश्रियो द्राग्।।१३।।

**इति श्री अर्हन्सहस्रनामसमुच्चये तृतीयं शतकम् । ।।३।।**

## चतुर्थ शतकम्

अष्टोत्तरसहस्राङ्गलक्षणः कृतलक्षणः ।
परंपरगतो भूतः, पञ्चमज्ञानवान् यती ॥१॥

सुलक्षणः स्तुतिसहः, सुश्री धीमानजोऽवशी ।
मार्यो वर्योऽस्मरः स्वामी, विवेकी नियमी शमी ॥२॥

साहसी संयमी बुद्धः, शास्ता शस्तः शुभाशयः ।
कर्मभूमिभवः सत्य-शासनो विनयी नयी ॥३॥

कर्मभूलब्धनिर्वाणः, सुभगः कुलदीपकः ।
आदिकृत् कुशलो जय्योऽनधीनो मार्गदर्शकः ॥४॥

अप्रमत्तो गतद्वेषः, सुप्रभावः शिवङ्करः ।
सौम्यो रम्यो नमस्कार्योऽध्यात्मविद् देवताऽजरः ॥५॥

अक्षरो विश्वविज्ञातो, धर्मचक्री सुरार्चितः ।
पिण्डस्थः पण्डितोऽपिण्डः, पदस्थस्तत्वमव्ययः ॥६॥

रूपस्थो विघ्नहृद् रूपा-तीतो जन्तुहितोऽग्रिमः ।
सर्वदुःखक्षयः सर्व-सत्त्वः सर्वाभयप्रदः ॥७॥

अविग्रहोऽनन्तरायो, जितात्मा जितलोचनः।
कल्पातीतो विश्वगुरू, रीतिभिद्धर्मसारथिः ॥८॥

जगज्ज्येयष्ठश्चिदानन्दोऽनुपमो बान्धवोऽधिभूः ।
मेरुजन्माभिषेकः श्री-सूचितः शक्रसंस्तुतः ॥९॥

सहायः स्थापनासेव्यो, नामाराध्यः प्रसन्नदृग् ।
उपसर्गसहः शुद्ध-चैतन्यः सन् विशेषवित् ।।१०।।

उग्रोऽनार्त्तः पृथुः प्रौढोऽभीष्टः शिष्टः कृतस्थितिः।
पुराणपुरुषो भाव-जिनो द्रव्यजिनोऽचलः ।।११।।

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृतितत्पराणां, भवन्तु भव्या विजयश्रियो द्राग्।।१२।।

**इति श्री अर्हन्सहस्रनामसमुच्चये चतुर्थं शतकम् ।।४।।**

## पञ्चमं शतकम्

गौरवार्हो गणी मौनी, गरीयान् स्थविरोऽद्भुतः ।
युगाधिकारी कार्यज्ञः, सुपार्श्वः कमलक्रमः ।।१।।

चतुर्दशस्वप्नलभ्योऽमितज्ञो महितोऽरजाः ।
धृतातपत्रश्चमर-चारुस्तथ्यगुणोऽग्रणीः ।।२।।

एकज्ञानः सत्यसन्धो, नायको नयनप्रियः ।
अशोकस्तपनोऽरौद्रस्तेजस्वी सुश्रुतोऽतिथिः ।।३।।

अव्याबाधसुखोऽसङ्ख्य-द्वीपोदधिनिरूपकः ।
नित्यप्रकाशो नियतो, निष्कलङ्को निराश्रयः ।।४।।

जगन्मित्रं जगद्बन्धु, धर्मनाथः कुलध्वजः ।
अनन्तरो यथाख्यात-चारित्री चरमः पुमान् ।।५।।

अलक्ष्योऽलक्षित: सिद्ध-दर्शन: प्रतिमानिधि: ।
वेदगर्भो ज्ञानगर्भो, वैराग्यो मुनिपुङ्गव: ॥६॥

सिंहासनस्थ: क्षायिक-पारिणामिकभाववान् ।
पर्युपास्यो वंशवृद्धो, वंशजो रजनीजनि: ॥७॥

जिनाधिराजो जिनेन्द्रो, जिनचन्द्रो विभूतिभुक् ।
जिष्णु: प्रवचनी चित्र-चरित: कीर्तिपुरुष: ॥८॥

आर्यभूमिज: कल्याणोऽसंदिग्धवचन: कृती ।
हितोपदेशको योगि-राजो रञ्जितरञ्जन: ॥९॥

निष्कामो निर्जरो राज-पूजित: पावितक्षिति: ।
प्रीतिकृत् पुण्डरीकाक्ष:, कल्पकारी भवान्तकृत् ॥१०॥

मङ्गल्यो मङ्गलावास:, श्रीवासोऽवनिमण्डनम् ।
महावैद्य: सुराधीश:, कृतसर्वमहोत्सव: ॥११॥

संसारतारकस्तीर्ण्ण:, पूर्ण्ण: परमभावन: ।
प्रसत्तिमान् पवित्रात्मा, संतोषी संमत: सुधी: ॥१२॥

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इत: सतां संस्मृतितत्पराणां भवन्तु भव्या विजयश्रियो द्राग्॥१४॥

**इति श्री अर्हन्सहस्रनामसमुच्चये पञ्चमं शतकम् ॥५॥**

## षष्ठं शतकम्

यशस्वी नारकानन्दि कल्याणकदिनोंऽशुमान् ।
नरर्षभः शक्तिशाली, सुसंतानः शुभान्वयः ॥१॥

अप्रमेयोऽपरिमित-प्रकाशी सर्वसंमतः ।
प्रियंवदोऽविसंवादि, सिद्धान्तोऽविकृतेन्द्रियः ॥२॥

मोक्षदो निपुणो जाति-वैरध्वंसी पितामहः ।
क्रियावान् वरदस्तीव्र-तपाः कश्मलनाशनः ॥३॥

वज्रर्षभसंहननः, कर्मठः कामितप्रदः ।
आद्यसंस्थानसंशोभी, कान्तिमान् केवलेक्षणः ॥४॥

विश्वदृश्वा महानादो, निर्निद्रो विमलाशयः ।
आम्नायवादी स्वाध्यायी, परमर्षिः परमर्द्धिकः ॥५॥

मुमुक्षुः समितः पाता, प्रमाता पूर्वदेशकः ।
परंब्रह्म परंतेजः, सुराचार्यो विदांवरः ॥६॥

गतिज्ञाताऽऽगतिज्ञाता, स्थितिज्ञाता परोपकृत् ।
धर्माधर्मास्तिकायज्ञो, ज्ञानवृद्धो महाबलः ॥७॥

निर्विकारो निर्विकल्पो, दिव्यतेजा निरीश्वरः ।
सर्वदः सर्वदेवेशः, क्षान्तिमान् निहतान्तकः ॥८॥

अनलङ्कारसुभगो, द्रव्यदो निष्परिग्रहः ।
आदिदेवः श्रुतधरः, सुप्रजातो गुणाकरः ॥९॥

ज्ञानगम्यो ब्रह्मचारी, जितनिद्रो महातपाः ।
आदित्यवर्ण्णो ज्ञानात्मा, भूतेशः श्रीमदऽग्रणीः ।।१०।।

रक्षी साक्षी तत्वदर्शी, सहिष्णुः सकलः सुहृत्।
कर्मध्वंसी शमनिधि, र्यतिराजो यतीहितः ।।११।।

सम्यग्दृष्टि र्मोहजयी, सर्वतीर्थमयोऽधिकः ।
सर्वदेवमयो देव-देवो, दिव्यध्वनिः सुदृक् ।।१२।।

ऐश्वर्यवान् शुद्धधर्मा, सुखी शक्तो जितश्रमः ।
यथावादि-तथाकारी, क्षीणबन्धो निरर्गलः ।।१३।।

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृतितत्पराणां, भवन्तु भव्या विजयश्रियो द्राग्।।१४।।

**इति श्री अर्हन्सहस्रनामसमुच्चये षष्ठं शतकम् ।।६।।**

## सप्तमं शतकम्

अनुत्तरसुरप्रश्नो-त्तरदाता नरद्विपः ।
क्षपकश्रेणिकृद् वर्ण्य-गोत्रस्तीर्थ-प्रर्वत्तकः ।।१।।

तीर्थादिस्तीर्थनिर्णिता, नततीर्थः समाहितः ।
प्रमाणसाध्यः प्रत्यक्ष-महिमा गुणवेदकः ।।२।।

भवज्ञोऽनन्तपर्याय-ज्ञायकोऽविषयोऽग्रगः ।
यथास्वरूपजातात्मा, विहायोविज्जिनर्षभः ।।३।।

असाध्यसाधकोऽबाध्य-बाधकोऽबोध्यबोधकः।
अलक्ष्यलक्षको देय-दायकोहेयहायकः ॥४॥

अतार्यतारको कार्य-कारकोऽहार्यहारकः ।
अमोच्यमोचकोऽस्पृश्य-स्पर्शकोऽवार्यवारकः ॥५॥

मनोगुप्तो वचोगुप्तः, कायगुप्तो दुरासदः ।
इर्यासमितिवान् भाषा-समितोऽध्येषणायुतः ॥६॥

आदानसमितः परि-ष्ठापनिकायुतोऽव्ययः ।
छिन्नग्रन्थ छिन्नशोक-श्छिन्नस्रोता अकिञ्चनः ॥७॥

सर्वस्पर्शसहो दक्षः, प्रशान्तो निर्वृत्तोऽक्षयः ।
उपशान्तोऽप्रतिहत-गतिः सामान्यविद् बृहन् ॥८॥

विनीतः शुद्धहृदयो, विप्रमुक्तोऽनतार्त्तिहृत् ।
भक्तिलभ्योऽप्रतिबद्धः, सिद्धिदाता तपोधनः ॥९॥

अप्रकम्प्यो निरालम्बोऽरुहन् प्रकृतिभद्रकः ।
श्रेयान् श्रेयः सममित्र-शत्रुः काम्यः सुखाश्रयः ॥१०॥

शमद्युम्नो योगधनो, महर्षिरुपतापहृत् ।
निर्ग्रन्थनाथो योगीशो, महोत्साही जिनप्रभः ॥११॥

सोमलेश्यो दीप्ततेजा, ज्ञानरूपो महालयः ।
विदितात्मा गर्ब्भगूढोऽभिग्रही जन्तुबान्धवः ॥१२॥

ध्यानलक्ष्यो ज्ञानदानी, नवतत्त्वनिरूपकः ।
असद्वादनिराकर्ताऽपूर्वसूरिः शिवाध्वगः ।।१३।।

आदेयनामा समव-सरणस्थो महेश्वरः ।
आदेयवाक्यो निष्णातो, वरीयांश्चरणोद्यतः ।।१४।।

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृतितत्पराणां, भवन्तु भव्या विजयश्रियो द्राग्।।१५।।

**इति श्री अर्हन्सहस्रनामसमुच्चये सप्तमं शतकम् ।।७।।**

## अष्टमं शतकम्

अरिहन्ता कृतिः पाद-लाञ्छनो योजनध्वनिः ।
सर्वभाषा परिणत-वाग् वादी वदतांवरः ।।१।।

साधुवादी दशविध-साधुधर्मोपदेशकः ।
आदिगुरुरुदारश्री-रालीनः प्रतिरूपकः ।।२।।

शुद्धप्रवचनः शुद्ध-चारित्रः शुद्धदर्शकः ।
योगक्षेमकरो योगा-चारज्ञो जननन्दनः ।।३।।

क्षीणज्ञानावृतिः क्षीण-दर्शनावरणो हरः ।
क्षीणमोहः क्षीणविघ्नः, स्वतन्त्रस्तेजसा ज्वलन् ।।४।।
?
परोक्षभाषी प्रत्यक्ष-भाषी दुर्नयमर्दकः ।
प्रमाणवादी वेदान्ती, नयज्ञो नयनामृतम् ।।५।।

एककालीनसप्तति-शतोत्कर्षो महोत्सवी ।
तुष्टिदः पुष्टिदः कान्ति-दायकः कीर्तिदायकः ॥६॥

एकदा विंशतिदश-जघन्यो नरशेखरः।
महालक्ष्मीप्रदो दत्त-कोटिदानो दयालुराट् ॥७॥

एकसामायिक-दश-विंशत्युत्पत्तिरङ्गकृत् ।
लाभदो लभ्यदो दम्भ-त्यक्तो भवविरक्तधीः ॥८॥

स्थिरो गिरामधिष्ठाता, प्रष्ठः पावनदर्शनः ।
उमाप्रियः कामरिपु, र्विश्वरूपो रमापतिः ॥९॥

नरकान्तकरः सोम-श्चिन्मूर्ति र्महितागमः ।
आत्मरूपो हृषीकेशो, भास्वान् विश्वहितावहः ॥१०॥

शाश्वतानन्दरूपः श्री-धरः स्थूलः प्रकाशकृत् ।
सुप्रभः प्रभवोऽसङ्ख्यः, सर्ववेदी महाकविः ॥११॥

ब्राह्मणोऽर्णुवरज्ञान-क्रियावादी विशारदः ।
धर्मधातु र्महाबोधिः, पञ्चज्ञानस्तथागतः ॥१२॥

समन्तभद्रः सुगतः, श्रीधनो मारजिद् दमी ।
सुनिश्चलो जगन्नाथो, लोकजिद् विश्वभूः खजित् ॥१३॥

धर्मराजो दयाकूपो, महासत्वो गुणाधिकः ।
सर्वार्थसिद्धः संगुप्तो, महापक्षो विनायकः ॥१४॥

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृति तत्पराणां, भवन्तु भव्या विजयश्रियो द्राग्।।१५।।

**इति श्री अर्हन्सहस्रनामसमुच्चये अष्टमं शतकम् ।।८।।**

## नवमं शतकम्

सत्यानुग्राहकः सत्व-शेवधिस्त्रिपदीप्रदः ।
लोकम्पृणगुणो धर्मा-धिकारी प्रशमाकरः ।।१।।

भीमकान्तगुणस्थाणु-स्तमःपारे प्रतिष्ठितः ।
आत्मारामः सुरज्येष्ठः, शिवतातिः शनैश्चरः ।।२।।

उत्पन्न-विगत-स्थायि-वस्तुवादी विभावसुः ।
भवोच्छेदी भयोच्छेदी, छिन्नसंसारबन्धनः ।।३।।

सृष्टिकृद् ब्रह्मनिष्ठात्मा, निर्व्यापारोऽक्षतव्रतः ।
वरेण्यो वनितात्यागी, विरक्तोऽसुखदुःखवित् ।।४।।

जगत्त्राता शुभध्यानो, महीयान् सर्वतोमुखः ।
सर्वतोदृक् ज्ञाननिधि, र्लोकोत्तरभवस्थितिः ।।५।।

असंस्थानोऽसंहननो, मैत्रीवान् मुदितायुतः ।
कारुण्यवानुपेक्षावान्, महात्माऽमर्मवेधिवाक् ।।६।।

कर्मानुभागवित् कर्म-स्थितिज्ञः कर्म्मबन्धवित् ।
कर्मप्रदेशभुक् कर्मो-दयज्ञः कर्मभाववित् ।।७।।

परिषहसहः सौभा-गिनेयो वीरसूसुतः ।
कुमोदकस्त्रिपुरजि-दतिजातोऽपुनर्भवः ।।८।।

स्थिरकर्मा समलोष्टु-काञ्चनो यक्षसेवितः ।
परमार्थनिष्ठितार्थः, सर्वतश्चक्षुरिष्टदः ।।९।।

प्रयतः संयतः प्राप्त-निर्वाणः सर्वतोगुणः ।
अविक्रियः प्रकृतिवि-च्चक्रवर्ती प्रभाकरः ।।१०।।

ग्रहपूज्यो ग्रहाधीशो, ग्रहराजः शुभग्रहः ।
आदिभूमानादिमुनि-रादिकर्ताऽऽदिकेवली ।।११।।

सरोरुहासनो धर्मी-नन्दनोऽष्टश्रवा ध्रुवः ।
भट्टारकः पूज्यपादः, श्रद्धालुहृदयङ्गमः ।।१२।।

चिद्रूपश्चित्रकृद्वृत्तः, प्रजापतिरनन्तजित् ।
पुष्पदन्तो गतोन्मादः, शान्तमूर्तिर्मनोहरः ।।१३।।

पुण्यकीर्ति र्विविक्तात्मा, निश्शङ्को देवपादपः ।
चिन्तामणिः कामगवी, कामकुम्भः स्थिरः स्थितिः ।।१४।।

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृतितत्पराणां, भवन्तु भव्या विजयश्रियो द्राग् ।।१५।।

**इति श्री अर्हन्सहस्रनामसमुच्चये नवमं शतकम् ।।९।।**

## दशमं शतकम्

स्थिराधीरपवर्गार्थी, सार्थवाहो महावपुः ।
भावदेवश्चतुः-षष्टि-हरिसेव्यो विचक्षणः ।।१।।

सिद्धसाध्यो नित्यसुखी, लोकान्तिकविबोधितः ।
अस्वप्नः सर्वतोभद्रः, स्नातको गतमत्सरः ॥२॥

विद्यादेवीषोडशक-वृतोऽष्टादशदोषजित् ।
षट्पञ्चाशत् दिक्कुमारी-सेव्यजन्मा जयावहः ॥३॥

सदाभावी सदाभूतः, सदाधर्मा सदाश्रुतः ।
सदास्तित्त्वो महाशक्तिः, सुग्रहो मुनिसुव्रतः ॥४॥

भविष्यन् भूतवान् वर्त-मानोऽमानो बृहत्तनुः ।
चित्रभानु बृहद्भानु-रभीरुरमरोऽनकः ॥५॥

परानपेक्षसिद्धार्थः, शोण्डीरः शुद्धमानसः ।
जातस्थामा निष्प्रकम्पो, दुर्धर्षोऽनुत्तरार्जवः ॥६॥

जातरूपस्तपस्तेजास्-तेजोराशिस्त्रयीमयः ।
क्षेत्रज्ञः शंभवः पद्म-मणिः शुद्धमतिः स्वभूः ॥७॥

चक्रपाणिः क्रतुच्छेदी-श्रीकण्ठो वृषकेतनः ।
श्रीवत्सलक्ष्मी र्लक्ष्मीवा-ननुत्तरविहारकः ॥८॥

त्रिविक्रमोदयो दानी, दीनोद्धारी धराप्रियः ।
माधवोऽबाध्यसिद्धान्तः, सिद्धिसेव्यो वरिष्ठधीः ॥९॥

मन्त्रविन्मन्त्रकृन्मन्त्र-मूर्ति र्निरूपमाश्रयः ।
अनादिनिधनो दत्त-दानोनुत्तरमुक्तिकः ॥१०॥

विभवश्चन्द्रमा एक-दृग् त्रिनेत्रः पवित्रहृत् ।
महाभोगो महाहंसो, महागोत्रो महायतिः ॥११॥

अचर्च्यचरितोऽनन्त-दर्शी वृजिनवर्जकः ।
राजराजो जनाधारो, हृद्यविद्यो गमागमः ।।१२।।

ध्याताध्यानं क्षमी वेत्ता, गीष्पतिर्गरिमालयः ।
तीर्थदेवीस्तुतस्तीर्थ-स्तोता वक्ता महासुखी ।।१३।।

मायाबीजं श्रियं दाता, कामराजो महामहः ।
कल्याणं मङ्गलं चैत्यं, नमः पदपुरस्सरः ।।१४।।

**(मङ्गलनामाष्टकं)**

देवाधिदेवस्य दशाधिकारसहस्रनामस्तवनस्य पाठात्।
इतः सतां संस्मृति तत्पराणां, भवन्तु भव्या विजयश्रियो द्राक् ।।१।।

---

तपागच्छाधिराजपरमगुरुश्रीविजयसेनसूरीश्वराणां विजयिनि राज्ये महोपाध्यायश्री मुनिविजयगणिशिष्यपंडित-**देवविजयगणि**विरचितश्री**अर्हन्नामसहस्रसमुच्चये** दशमोधिकारः समाप्तः ।।१।. ग्रंथ अक्षरगणना १४१ श्लोकः ।।छ।।

सं.मुनिश्रीसम्यग्दर्शनविजयाः

# महायमकमयीश्रीनेमिजिनस्तुतिसटिक

महायमकमयी इयं नेमिजिनस्तुतिः श्रीमताजयसागरमहोपाध्यायेन विरचिता विवृत्ता च, तस्याः प्रतिर्मयाऽऽप्ता पत्तनस्थश्रीहेमचन्द्राचार्यज्ञानमन्दिरस्य ५३५० क्रमाङ्किता, लिखिता च १६२० विक्रमाकवत्सरे।

उपलब्ध्यैकप्रत्या संपादने संभवन्ति क्षतयः, क्षन्तव्यश्चाहं विद्वद्भिः।

**सकलभावमहावनगारतः सकलभावमहावनगारतः ।**
**सकलभावमहावनगारतः, शिवसुखं वितनोतु शिवाङ्गजः ।।१।।**

**अस्य व्याख्या :** शिवाया देव्या अङ्गजो **शिवाङ्गजो** नेमिनाथो जिनः **शिवसुखं** मुक्तिशर्म्म वितनोतु-विस्तारयतु। कथंभूतः शिवाङ्गजः। **सकलभावमहावनगारतः** सकलाः समस्ता भावाः परमनोमोहोपजनकाः सकलाश्चैते भावाश्च सकलभावाः। महच्च तद्वनं महावनं सकलभावा एव महावनं सकलभावमहावनं तत्र गच्छन्ति ये ते सकलभावमहावनगाः कामिनस्तेषु अरतोऽनासक्तो यः स। सकलभावमहावनगारतः पुनः कथंभूतः? **सकलभावमहावनगारतः।** कलाः मनोहराः ये भावा विभूतयो महाँश्चोत्सवास्तेषां अवनं वृद्धिस्तेन सह वर्तन्ते ये ते सकलभावमहाऽवनाः साधवः तेषां गारं-विज्ञानं तं तनोति विस्तारयति यः सः। **सकलभावमहाऽवनगारतः। गृत्कट् विज्ञाने इति कविकल्पद्रुमोक्तेः।** पुनः कः स? **सकलभावमहावनगारतः।** कलाः प्रशस्ताः ये भावा लीलास्तैस्सह वर्तन्ते ये ते सकलभावाः राजानस्तेषु महनं महः पूजा तमवन्ति प्राप्नुवन्ति ये ते सकलभावमहावाः श्रावकास्तेषां नो-हिंसा तं गालयति-तनक्ति या सा सकलभावमहावनगालाः एवंविधा ता- संयमश्रीर्यस्य स सकलभावमहावनगारतः ।।१।। **प्रथमस्तुत्यर्थः**

**सकलभावमहावनगारतः सकलभावमहावनगारतः।**
**सकलभावमहावनगारतः, शिवसुखं वितनोतु शिवाङ्गजः ।।२।।**

**अस्य व्याख्या :** हे वितनो! रतः! विशिष्टा तनुः शरीरं यस्य स वितनुस्तत्

संबुद्धौ हे वितनो! साधो नवेत्यध्याहारः। सकलभावमहाः कला षोडशांशस्तया सह वर्तते यः स सकलः भानि-नक्षत्राणि अवति गच्छति प्रत्यहमाश्रयं नीतिभावश्चंद्रः। सकलो यो भावः सकलभावस्तद्वन्महश्च कांतिः येषां ते सकलभाव-महास्सर्वजनदर्शनार्हत्वं विदधत्त्वात् चतुर्विंशतिजिनाः शिवसुखं-निरुपद्रवशर्म्म कुर्व्वंत्वित्यध्याहार्यं। किं विशिष्टास्सकलभावमहा! वनगाः। वन संभक्तौ। वननं वनः सेवा तं गाते-पाप्नुवन्ति ये ते वनगाः। **गांङ् गतौ इति कविकल्पद्रुमोक्तेः।** गत्यर्थानां प्राप्त्यर्थत्वादिति। किं विशिष्टः हे वितनो! हे रतः रं-कामं तौति-हिनस्ति यः स रतस्तत्संबुद्धौ हे रतः तुल्यवृत्तिहिंसापूर्तिस्थितिवचनात्। पुनः किं विशिष्टाः सकलभावमहाः? सकलाः-समस्ताः भाः प्रभावास्ताभिर्वर्त्तयति राजते यः स सकलभावः केवलज्ञानं तस्य महो वृद्धि र्येभ्यस्तेः सकलभावमहाः। **वृत्क दीप्तौ कविकल्पद्रुमे। भा प्रभावे-मयूखे चेत्यनेकार्थवचनात्।** पुनः किं विशिष्टः हे वितनो। हे वनगारतः वः-सांत्वनं नो-बुद्धिः गारो-विज्ञानं वच्च नश्च गारश्च व-न-गारास्तान् तनौति विस्तारं नयति यः स वनगारतस्तत्संबुद्धौ। पुनः किंविशिष्टाः सकलभावमहाः सकलाभाः। डलयोरैक्यात् सकडभाः। कडश(भ)दर्प्पे केडनं कडो-दर्प्पस्तेन सह वर्तते ये ते सकडाः बौद्धमतादयस्तान् भञ्जन्ति ये ते सकलभाः। पुनः किं विशिष्टाः सकलभावमहाः? वमहाः। ऊश्चाऽमश्च वमौ सर्वजीवरक्षा-ज्ञाने तयो र्हाः-निवासाः ये ते वमहाः। **यदुक्तमेकाक्षरे-हेः शूलिनिकरे-नीरे-क्रोधगर्भप्रभाषणे-निवास इति वचनात्।** पुनःकिं विशिष्टाः सकलभावमहाः। वनगाः वनसंभक्तौ वनाः सेवकास्तान् गुडन्ति संसारभयाद्रक्षन्ति ये ते वनगाः। **गुडशूरक्ष इति कविकल्पद्रुमोक्तेः।** पुनः किं विशिष्टः। हे वितनो! हे रत! रो-रामःस्तद्वत् ता-ज्ञानादिश्री यस्य स रतस्तत्संबुद्धौ। **रःकामे तीक्ष्णे वैश्वानरे नरे रामे वज्रे च शब्दे स्यादित्येकाक्षरवचनाद्।** पुनः किंविशिष्टः हे वितनो हे शिवाङ्गज शिवं मुक्तिस्तस्या अङ्गानि ज्ञानादीनि तानि जनयति निष्पादयति यः स शिवाङ्गजः स्तत्संबुद्धौ ।।२।।

**द्वितीयस्तुत्यर्थः।**

**सकलभावमहावनगारतः सकलभावमहावनगारतः.**

**सकलभावमहावनगारतः शिवसुखं वितनोतु शिवाङ्गजः ।।३।।**

**अस्य व्याख्या :**

हे महाव। महान् अवो–ज्ञानं यस्य स महावस्तत्संबुद्धौ हे महाव–सिद्धान्त! त्वमितिशेषः। नोऽस्माकं सुखं सुष्ठु खं सुखं अवं कुरु। **खमिंद्रिय स्वर्ग–शून्य–भूपाकाश–सुनैषु चेत्येकाक्षरवचनात्।** अथ कविः संबोधनैः प्रथमांत विशेषणैश्चविशिनष्टि। हे सकलभाव!। कलाः मनोमोदकराः ये भावा–जीवाऽजीवा–दिपदार्थास्तैः सह वर्तते यः स सकलभावस्तत्संबुद्धौ। हे महाव महा उत्सवास्तान् अवति वृद्धिं नयति यः स महावस्तत्संबुद्धौ। कथंभूतस्त्वं हे महाव!। नगारतः। नो–हिंसा तं गच्छन्ति–प्राप्नुवन्ति यानि तानि नगानि। नगानि च तानि आराणि च नगाराणि–भावशत्रुकदम्बका स्तानि तस्यति–खण्डयति यः स नगारतः। हे सकलभ! रलयोरैक्यात् सकरभः, सः–सूर्यः तस्य कराः किरणास्तान् भनक्ति हिंसति यः स सकलभस्तत्संबोधने ज्ञानालोकेन मोहतमोहरत्वात्। हे नग! नो बुद्धिरर्थाद्धर्मबुद्धिस्तं गापयते प्रापयति यः स नगस्तत्संबुद्धौ। पुनः कथंभूतस्त्वं आरत!। रलयोरैक्यादालतः आलं–अनर्थं तिघ्नौति–हिंसति यः स आलतस्तत्–संबुद्धौ। सम्यक्तयाऽऽराधितत्वात् हे सकलभ!, शसयोरैक्यात्। शकलभ! शकं शक्तिं–सामर्थ्यं लाभयति प्रापयति अर्थाद् भव्यजनानां दुष्टाष्टकर्म्मजयने यः सः। सकलभस्तत्संबोधने। हे अव! महाव! अवन्ति प्रजां रक्षन्ति ये ते अवाश्चक्रवर्त्यादिराजानस्तेषु महः पूजाविशेषमवति प्राप्नोति यः स अव महावस्तत्संबुद्धौ। हे नगा! **ना–नराः नो नरे वसनाद्येऽपीति विश्वशंभुवचन–प्रामाण्यात्।** तान् गाति प्राप्नोति यः स नगस्तत्संबुधौ। भव्यमनुजैरधीतमित्यर्थः। पुनः कथंभूतस्त्वं अरतः? रलयोरेक्यात् अलतः। अला–समर्थाऽर्थाज्जनानां दरिद्रं हर्त्तुं ता–लक्ष्मी यस्य स अरतः। हे शिव! उपद्रवरहितः।

हे वित! विशेषेण सर्व्वजीवान् तयते पालयति यः स वितस्तत्संबुद्धौ। **तयङ्**

**गतिरक्षयोरिति कविकल्पद्रुमोक्तेः।** तु पादपूर्तौ। कथंभूतस्त्वं शिवाङ्गजः शिवं क्षेमं अङ्ग्यते प्राप्यते येभ्यस्ते शिवाङ्गाश्चतुर्विंशतिजिनास्तेभ्यो जातो य स शिवाङ्गजः ।।३।। **तृतीयस्तुत्यर्थः।**

**सकलभावमहावनगारतः, सकलभावमहावनगारतः**

**सकलभावमहावनगारतः, शिवसुखं वितनोतु शिवाङ्गजः ।।४।।**

**अस्य व्याख्या :** हे सकल! सा-प्रकृष्टा कला यस्य स सकल-श्चतुर्विध संङ्घस्तत्संबोधने। हे सकल! युष्माकमितिशेषः। भावमहा। भावेन रागेणोपलक्षणाज्जनै र्महिता पूजिता या सा भावमहा-शासनदेवता शिवसुखं वितनोतु। प्रथमस्तुतिवत् क्रिया। किं विशिष्टा भावमहा? वनगा। वनन्ति प्राणिनामुपकृतिं कुर्व्वन्ति ये ते वनाश्चतुर्विंशति जिनास्तान् गेवते प्रत्यहं सेवते या सा वनगा। **वन्कि श्रद्धोपकारयोः। खेव-गेव-ग्लेवृङ सेवे। इति कविकल्पद्रुमधातुपाठोक्तेः।** कथंभूत हे सकल! हे आरत । आरं-कर्म्मशत्रुसमूहं तस्यति यः स आरतस्तत्संबुद्धौ हे आरतः। पुनः किं विशिष्टा भावमहा? सकलभा सं-प्रकृष्टप्रकारेण कलं-अजीर्ण-रोगविशेषं भनक्ति या सा सकलभा। **कलं त्वजीर्ण-रेतसोरित्यनेकार्थवचनात्।** पुनः किं विशिष्टा?। अवमहा अवनं अवः-प्रीतिस्तं मलयति धारयति यः स अवमः। ईदृक्षो हः-करो यस्या साऽवमहा। **हः शूलिनिकरे नीर इतिवचनात्।** प्रशस्तहस्तेत्यर्थः। पुनः किं विशिष्टा वनगा। वं-सांत्वनं नयन्ति प्रापयन्ति ये ते वना-श्रावका स्तेषामुपल-क्षणत्वाद्दुःखादिहनने गुरुते उद्यमं करोति या सा वनगा। सर्व्वरोगदोषादिविनाशिका इत्यर्थः। **गुडीशिगूरव उद्यमे इति कवि-कल्पद्रुमे।** पुनः किं विशिष्ट! हे सकल! हे आरत! आ-लक्ष्मीस्संयमादिस्तस्यां रतः आसक्तो यः स आरतस्तत्संबुद्धौ। सम्यक्तया तपोध्यानकर्ता इत्यर्थः पुनः किं विशिष्ट! हे सकलभाव । कल एव ज्ञानमेव भावो विभूतिः कलभावः सहकलभावेन वर्तते यः स सकलभावस्तत्संबुद्धौ। अन्यतीर्थिणां प्रत्युत्तरदातृत्वात् ज्ञानसमृद्ध इत्यर्थः। पुनः कथंभूता भावमहा!। महावनगा महतां सतां अवनं रक्षणं गच्छति प्राप्नोति महावनगा

सेवकानां रक्षाकर्त्रीत्यर्थः। पुनः कथंभूता भावमहा?। महावनगा। हे सकल हे आरतः!आ-सामस्त्ये नरं-कामं तिक्नोति यः स आरतस्तत्संबुद्धौ। **तिक्नास्कंधे-वधे**। 'क्वचिद्ड' प्रत्यये सिद्धिः। पुनः कथंभूत हे सकल हे शिवाङ्गज! शिवं निरुपद्रवं अङ्गं ज्ञानं जनयति यः स शिवाङ्गज स्तत्संबुद्धौ है शिवाङ्गज! ।।४।। इति

**श्रीमच्छ्रीजयसागरमहोपाध्यायकृत श्री नेमिनाथस्तुति वृत्तिस्समाप्ता।**

**खशंभुमुख-षणमुखमुखमेरुमितेवत्सरेऽब्दे (१६३०) कृता स्तुतिसुवृत्तिः**

# निःश्रेयसम्

संस्कृत-पत्रम्

## खण्ड-२

## अर्वाचीन कृतयः

आ.श्री विजयमुक्तिप्रभसूरिवराः

# श्रीशारदाद्वात्रिंशिका

चित्तचिन्ताऽपचित्येकचिन्तामणिम्, बुद्धिमन्मानसाम्भोरुहाहर्मणिम्।
भक्तचेतश्चकोराय रात्रीमणिम्, शारदां स्तौमि चातुर्यचूडामणिम् ।।१।।

**(स्रग्विणीवृतम्)**

नम्रकम्रामरेन्द्रस्तुतिप्रस्तुते !, ज्ञानशक्तिप्रदानैककार्यान्नुते!,
केतकप्रांशुपत्रद्विनेत्रान्विते, तिष्ठ मन्मानसे देवि! वाग्देवते! ।।२।।

तीर्थकृत्कम्रवक्त्राम्बुजाते! रते, ज्ञानसञ्चारिके चारुदेहद्युते! ।
ध्यानरक्तस्वकासक्तभक्तान्विते, देहि विद्यां परां शारदे! देवते! ।।३।।

विघ्नसङ्घातकण्ठीरवाष्टापदा, सर्वकल्याणनिर्माणमालाप्रदा।
यत्पदेन्दिवरे धीवराः षट्पदाः, अस्तु सा शारदा सर्वदा सारदा ।।४।।

नव्यकाव्यान्तरिक्षे जगत्साक्षिणः, **हेमचन्द्रा**दिधीधाममेधाविनः
पूर्वदिक्सन्निभा सर्ववाक्स्वामिनः, भारति! त्वं प्रसूस्त्वं प्रसूः ज्ञानिनः ।।५।।

स्वर्णकर्णावतंसप्रभाधारिणीम्, सर्वसन्तापपापाद्रिविद्राविणीम् ।
वाग्मि चातुर्यचेतश्चमत्कारिणीम्, भारति! त्वां स्तुवे भीतिसंहारिणीम् ।।६।।

ये निशान्ते निशान्तेऽपि ते तत्त्वदे!, नाम सन्मानदानप्रदं धैर्यदे !।
जन्तवो नो भजन्ते शुभं शारदे!, गौरवागारहर्षप्रकर्षप्रदे ! ।।७।।
ते निमग्ना निरालम्बिता निर्गुणे, सन्ति गुर्वज्ञतासागरेऽकारणे।
ते वसन्तश्च लोकेऽपि विद्याङ्गणे, हन्त वासं हि कुर्वन्त्यलोकाङ्गणे ।।८।।

(युग्मम्)

सिद्धिदानं न ते साधना मुञ्चति, नैव सा निष्फलत्वं कदाप्यञ्चति ।
साधकौघो विचार्येत्थमागच्छति, त्वत्पुरः साधनातो धियं वाञ्छति ।।९।।

तद्विलोक्यैव लोकानुगः शारदे !, संश्रितोऽहं सदा प्रेमभावप्रदे !
ज्ञानभिक्षाप्रतीक्षाकरःकामदे !, देहि मे देहि विद्याधनं धीप्रदे ।।१०।।

न त्वयि प्राज्ञतादानशक्ति र्यदि, तद् वद त्वं तदा नास्ति शक्तिर्मयि ।
अस्ति चेद् किं विलम्बेन विद्यानदि !, वर्धमानाऽस्ति श्रद्धा सदा मे हृदि ।।११।।

ज्ञातमाः भारति! ब्रह्मसंवाहिनी, बुद्धिदानेश्वरी ज्ञानसंवाहिनी ।
त्वं हि बह्वज्ञताध्वान्तविध्वंसिनी, पूर्णकारुण्यभावाक्षिसंदर्शिनी ।।१२।।

ध्यानतस्तेऽन्यथा ध्यन्धतावाहिनी, साधुसत्सन्ततिः सौम्यताशालिनी ।
कं समाश्रित्य जाताऽज्ञतानाशिनी, प्राज्ञपङ्क्तिप्रधानत्वसंभाजिनी ।।१३।।

पण्डिताः पद्मवक्त्रे! त्वया मण्डिता, अज्ञताताण्डवाडम्बरादण्डिताः।
वाणि! पाखण्डवादास्त्वया खण्डिताः, त्वं हि सर्वत्र सम्यक्कलामण्डिता।।१४।।

देव्यतः ज्ञप्तिवित्तप्रदानक्षमा, निश्चिता त्वं मया कल्पशालोपमा ।
ऐंनमः मन्त्रजापेन वाचंयमाः, प्राप्नुवन्ति द्रुतं प्राज्ञतामग्रिमाम् ।।१५।।

श्वेतपक्षाङ्गचक्राङ्गसंगामिनी देवि!, दिव्यांशुवस्त्राङ्गसंधारिणी ।
चार्वलङ्कारलोलाऽलकाऽशालिनी, त्वं त्रिलोके प्रतिप्राणि सञ्जीवनी ।।१६।।

कुन्दनीहारहारेन्दुवर्णोज्वले!, शारदे! शारदेन्दुप्रभे ! निर्मले!।
त्वं स्थिरे मे कुरु द्राक् घने चञ्चले, लोचने पापवल्लीविदाहानले ! ।।१७।।

सर्वविघ्नौघसारङ्गकण्ठीरवम्, सर्वशर्मावलीवल्लीविद्युद्धवम्।
मन्त्रराजं त्वदीयं महागौरवं, राजते भारति! ज्ञानरत्नार्णवम् ।।१८।।

तं महामन्त्रदेवं मनोमन्दिरे, स्थापयन्ति प्रमोदेन ये सुन्दरे।
नो लभन्ते भयं क्वाऽपि विद्येन्दिरे!, ते जनाः सौख्यभाजः सदा मन्दिरे ।।१९।।

शारदे! त्वत्कृपादृष्टिसद्वृष्टितोः, येऽज्ञभावं भजन्तोऽसुमन्तः पुरा।
धीमतां ते मनोरञ्जकास्तत्त्वतः, संभवन्त्याशु भूता भविष्यन्त्यतः ।।२०।।

निर्मलध्यानरक्तैकचित्तान्विताः, पण्डिता भक्तिभावेन श्रद्धान्विताः ।।
त्वत्पदाम्भोजयोः भृङ्गभावं गता, -ते परागं वहन्त्यद्य-पुष्पव्रताः ।।२१।।

ग्रन्थनिर्माणशक्त्यब्जतिग्मद्युतिम्, वादिदुर्भेदवादक्षपांशुद्युतिम् ।
शास्त्रसंवित्-स्रवन्ती-स्रवन्तीपतिम्, स्तौमि सद्भावतो भाऽञ्चितां भारतीम्।।२२।।

देवदेवेन्द्रविद्याधरै र्वन्दिते !, सद्गुणस्थानरूपेण संवर्णिते! ।
साधुसाधुव्रतव्रातसन्मानिते!, विघ्नवृन्दं हर त्वं द्रुतं देवते! ।।२३।।

केवलालोकहेत्वागमज्ञानदे ! वाणि! विख्यातसत्कीर्तिकान्तिप्रदे! ।
भावरोगार्त्त-भव्यौघभैषज्यदे ! त्वं प्रसीद प्रसादप्रदे ! शारदे! ।।२४।।

प्राज्ञवृन्दैः सदैवापि संविद्वरैः, त्वत्प्रसादः समासादितः सादरैः ।
शारदे! यैरहो सेव्यसेवापरैः, सेव्यपादाश्च जाता पुनस्तेऽपरैः ।।२५।।

शौर्य-सौन्दर्य-सौहार्द-तेजोमयी, प्रेमपीयूषसन्दोहमैत्रीमयी ।
भारति ! त्वं सदानन्दलीलालया, विश्वविख्यातसत्-कीर्तिकान्तालया ।।२६।।

सर्वदोषप्रदोषांशुमद्भास्वरा, सद्गुणाप्त्यङ्कुरोत्पत्तिधाराधरा ।
ज्ञानगङ्गाहिमप्रस्थपृथ्वीधरा, शारदे! त्वं हि विश्वाग्रविद्याधरा ।।२७।।

कष्टमिष्टायतेऽग्निस्तुषारायते, कालकूटोऽपि पीयूषधारायते ।
शारदे! मन्दबुद्धिः प्रबुद्धायते, त्वत्प्रसादाद् धरा स्वर्गलोकायते ।।२८।।

त्वन्मुखाब्दाद् द्रुतं वत्स ! विद्वान् सदा, त्वं भवेत्यभ्रगम्भीरनादं मुदा ।
शारदे! श्रोतुमश्रान्ततावद् हृदा, भक्तवर्गो मयूरायते सर्वदा ।।२९।।

त्वद्गुणव्रातवार्ताव्रजं वक्त्रतो, वक्तुमुल्लेखितुं हस्तसाहस्रतः ।
हे! सरस्वत्यहो! द्रष्टुमुद्दृष्टितो, वाग्मिवृन्दोऽपि नैवास्ति शक्त्यन्वितः ।।३०।।

नाममन्त्रं त्वदीयं सुधानिर्झरि !, ये स्मरन्त्येकचित्तेन चिन्ताहरि ! ।
ते प्रमोदश्रियं विश्वविश्वेश्वरि !, प्राप्नुवन्त्येव द्राक् देवि! वागीश्वरि ! ।।३१।।

शारदे त्वद्गुणस्तोत्रपाठावहास्-त्वत्प्रसादेन सद्भाग्यभाराऽऽवहाः
सन्तु सौभाग्य-माङ्गल्यमालावहाः, नित्य**मुक्तिप्रभु**त्वाभिलाषावहाः ।।३२।।

## प्रशस्तिः

श्रीयुक्त**प्रेमसूरेः** प्रवरदिनमणेः श्रीतपःसद्गणाभ्रे ।
पट्टालङ्कारवाचस्पतियतिततिराड्-**रामचन्द्रा**ख्यसूरेः ।।
पन्न्यासः प्राज्ञवन्द्यश्चरणकजरजा नाम **मुक्ति**गणीन्द्रः ।
शिष्यस्तस्य व्रतिश्री **जय**पदयुतसत्**कुञ्जर**ाख्यो वरेण्यः ।।१।।

(२०२२)
तत्शैक्षेनाऽ**क्षिपक्षाभ्रपथयुगमिते** वैक्रमे वत्सरे च ।
पञ्चम्यां माघमासे शशिकिरणशुचौ स्तंभतीर्थाधिराजे ।।
मुक्तं **मुक्तिप्रभेण** प्रबुधजनगणे शारदास्तोत्रमेतद् ।
क्षन्तव्या सज्जनैश्च क्षतिरतिविमलैः स्युर्यदि ते कृपाऽऽर्द्राः ।।२।।

गणि श्रीउदयरत्नविजयाः
मुनि श्रीराजदर्शनविजयाः
(पू.आ.श्री विजयरामसूरिवराणां
शिष्यः-डहेलावाला)

# युगादीश्वराष्टकम्

(हरिगीतछंद)

तव देहयष्टिः स्वर्णमयी, सिंहासनमऽपि स्वर्णमयम्,
स्वर्णाङ्किंतं छत्रत्रयं, पदकमलं सुवर्णवर्णकम् ।
स्वर्णांशुरञ्जितवैभवं त्वं, दर्शय समवसरणम्;
वन्दे युगादीश्वर! प्रभो!, तव चरणकमलमहर्निशम् ।।१।।

रत्नत्रयोद्भासक ! प्रभो!, मोहत्रयह्रासक! प्रभो!,
तत्त्वत्रयज्ञापक ! प्रभो!, भवसागरतारक! प्रभो! ।
सम्यक् श्रुतं सम्यग् व्रतं, देहि प्रभो! बोधिबीजम्;
वन्दे युगादीश्वर! प्रभो!, तव चरणकमलमहर्निशम् ।।२।।

विश्वैकवात्सल्यार्णव!, विश्वैकतारक! जिनपते!,
सकलात्मनश्शिवकृते, पृथ्वीतले विहरसे प्रभो! ।
निखिला जना रम्यं शुभं, श्रुण्वन्ति ते वचनामृतम्;
वन्दे युगादीश्वर! प्रभो!, तव चरणकमलमहर्निशम् ।।३।।

मधुरं स्वरं मधुरं वचस्, तव ह्रदयमपि मधुरं प्रभो!,
मधुरं मुखं मधुरं स्मितं, तव चरणमपि मधुरं प्रभो! ।
मधुराः गुणास् त्रिभुवनतिलक!, तव दर्शनम् मधुरं प्रभो!;
वन्दे युगादीश्वर! प्रभो!, तव चरणकमलमहर्निशम् ।।४।।

मूर्खो मतिं रुग्णोऽगदं, दुःखी सुखं सुखी शमं,
नि:स्व: श्रियं भीतोऽभयं, खिन्नो रतिं विगुणो गुणं ।
त्रिभुवनपतेर्दृष्ट्वा मुखं लभते न किम् किम्! कः कः;
वन्दे युगादीश्वर! प्रभो! तव चरणकमलमहर्निशम् ।।५।।

पुण्यं सुखं चाल्पं दुःखं, पापं च बहु भवसागरे,
दुर्वारसंसारात् कदा मुक्तिं गमिष्यामीश्वर ! ।
त्रायस्व मां करुणानिधे !, तव चरणपङ्कजेऽहं लीनो;
वन्दे युगादीश्वर! प्रभो!, तव चरणकमलमहर्निशम् ।।६।।

पश्यन्ति ते धन्या जना, वदनाम्बुजं सन्ध्यात्रयम्,
अर्चन्ति ते धन्या जना, श्चरणाम्बुजं पूजालयम् ।
ध्यायन्ति ते धन्या जना, नयनाम्बुजं ध्यानालयम्;
वन्दे युगादीश्वर! प्रभो!, तव चरणकमलमहर्निशम् ।।७।।

मनसि प्रभुर्वचसि प्रभुः, काये प्रभु स्त्वमेव त्वम्,
कारुण्यपुण्यवशात् प्रभो!, ममास्तु ते शुभदर्शनम् ।
हे **राजराजेश्वर**! प्रभो!, "**उदयाय**" मे प्रकटीभव;
वन्दे युगादीश्वर! प्रभो!, तव चरणकमलमहर्निशम् ।।८।।

# सूरिरामचन्द्रप्रवचनांशः

मोक्षे सुखमस्त्यवितथं, न यत्र कायस्य वर्तते सङ्गः।
आयातं नापैति यत्तदेव, खलु तात्त्विकं सौख्यम् ॥१॥

प्राणानुपालनार्थं न, कस्यचिद्वस्तुनो शिवेऽपेक्षा ।
मृत्युर्वा रोगोवा, स्याातामाराच्च परमपदे ॥२॥

सिद्धशिलायां नैव, स्पर्धा च जयश्च पराजयश्च स्युः।
जीवनमात्मायत्तं, निजानुभवरीतिसम्बद्धम् ॥३॥

पृच्छा न नावरोधो, न याचना बन्धनं च किञ्चिदपि।
पीडा वा परकीया, शिवे पदे नैव दृश्यन्ते ॥४॥

लब्ध्वा केवलबोधं, जीवोऽशुभचिन्तनैर्विनिर्मुक्तः ।
सकलसुखान्यनुभवति च, चेतनया सकलया सततम् ॥५॥

विज्ञानं द्रव्याणां, पर्यायाणां भवत्यनन्तानाम् ।
नाज्ञेयमस्ति तत्त्वं, मुक्तिपदस्थायिनां किञ्चित् ॥६॥

सौख्यसंवेदनायां, तृष्णालेशोऽपि नास्ति जीवातोः।
परिशुद्धा परमगतौ, भवत्यवस्थाऽऽत्मनः काचित् ॥७॥

सर्वे विलसन्ति गुणा, दोषस्त्वेकोऽपि विद्यते नैव ।
चित्तेऽशान्तिः हृदयेऽशुद्धि र्न हि भवति निर्वाणे ॥८॥

पूर्वं वा पश्चाद्वा, सुखस्य दुःखं न सम्भवति किञ्चित् ।
आत्मा परमात्मपदे, विराजते सर्वदाऽऽनन्दे ।।९।।

कर्मक्षयोपजाते सौख्ये, कर्मोदयोऽस्ति नहि कश्चित् ।
नह्यन्तरायबाधाऽक्षयस्थले काऽपि सम्भवति ।।१०।।

विषयपिपासाऽनुरतो, यत्नशतान्याचरत्ययं जीवः ।
सुखमल्पं बहु दुःखं, संसारस्यैष परमार्थः ।।११।।

मोक्षार्थं पुरुषार्थः, सुखस्य मार्गोऽस्ति वास्तवोऽत्र भवे।
**श्रीरामचन्द्रसूरि**, र्वदति भव प्रीतिमान् सिद्धौ ।।१२।।

अनुवादकः- देवर्धिः

**आधार पुस्तकं - अंश प्रवचननो, सार द्वादशांगीनो**

मुनिश्री सम्यग्दर्शनविजयाः

# चारित्रसप्तविंशिका

## मङ्गलम्

**श्रीपार्श्वनतिः**

ऐन्द्रश्रेण्याऽभिषिक्तं, प्रवरगुणनिधिं, प्लुष्टदुष्कर्म-पङ्कम्,
विघ्नाब्धौ पोततुल्यं, व्यपगतविपदं, सर्वकल्याणकन्दम् ।
नीले वक्त्रे दिदीपे घनपटलनिभे, यत्फणारत्नकान्तिः;
शङ्खेशं पार्श्वयक्षार्चितपदकमलं, भृंगवत् संश्रयेऽहम् ।।१।। (स्रग्धरा)

**श्रीवीरसूर्यनतिः**

वीरोऽपूर्वोऽस्ति भानुर्जगति न तमलं, कोऽपि जेतुं गुणैस्स्यात्,
वाणीभासा समस्तां कुवलयजनतां, बोधयन् सर्वकाले ।
स्वस्मिन्नुग्रः परस्मिन् कमलमिव मृदु, क्लेशदोषातमोहृत्;
सर्वै कर्मग्रहैश्चाऽप्रतिहतविभवः, श्रेयसे सोऽस्तु नाथः ।।२।। (स्रग्धरा)

**सदागमनतिः**

श्रीद्वादशाङ्गं, शुभभावनाङ्गम्, श्रेयोनिधानं सुगतेर्निदानम् ।
सच्चित्तहारं, कृतविघ्नदारम्,सिद्धान्तसारं प्रणतोऽस्म्युदारम् ।।३।। (इन्द्रवज्रा)

**चारित्रनतिः**

सर्वदोषनाशकाय, सर्वपापह्रासकाय ।
सर्वथैव निर्भयाय, संयमाय मे नमोऽस्तु ।।४।। (समानिका)

**चारित्रगतिः**

विना विवेकं न भवेद्विरागः,त्यागो विरागादुपपद्यतेऽरम् ।
त्यागश्च चारित्रवसोर्निधानम्,चारित्रलाभोऽस्तु निवृत्तियानम् ।।५।। (उपजाति )

**चारित्रधरस्तुतिः**

विभावभावेष्वप्रसक्तचित्तम्, विरागभावैर्न कदापि रिक्तम् ।
विवेकभावैश्च सदैव सिक्तम्, चारित्रवन्तं हितदं प्रणौमि ।।६।।

चित्ते जिनोक्तिं परिभावयन्तम्, गुरुं च देवं समुपासमानम् ।
विवेकवन्तं गुणगौरवाढ्यम्, चारित्रवन्तं हितदं प्रणौमि ।।७।।

पुराकृतं कर्म विनाशयन्तम्, शुभं च पुण्यं समुपार्जयन्तम् ।
स्वकीयचित्तं च विशोधयन्तम्, चारित्रवन्तं हितदं प्रणौमि ।।८।।

पाताल-भू-स्वर्पतयो नता यम्, त्रिलोकसंपत्त् तु यतो न दूरे ।
सिद्धिः समग्राऽपि समीपमस्य, चारित्रवन्तं हितदं प्रणौमि ।।९।।

सदात्मसौख्ये वितनोति दार्ढ्यम्, परार्थकार्येण लसद्गुणाढ्यम् ।
जिनेन्द्रवाचा लभमानसाध्यम्, चारित्रवन्तं हितदं प्रणौमि ।।१०।।

**चारित्रस्तुतिः**

चारित्रं विजहाति सर्वमशुभं, श्रेयः-समाधिप्रदम्,
चारित्रं प्रवरं सदा शुभकरं, कर्मद्विषां घातकम्।
चारित्रं वितनोति सौख्यमतुलं, सर्वार्थसिद्धिप्रदं;
चारित्रं भवपापतापशमनं, चारित्रमेवाऽभयम् ।।११।। (शा.वि.)

**चारित्र-प्रीतिः**

चारित्रं धर्मसारं भवविरहधिया, यस्य सेवाऽऽत्मशुद्ध्यै,
चारित्रं ज्ञानसारं वितरति भविनां, सत्य-मिथ्याविवेकम्।
चारित्रं सौख्यसारं नहि जगति सुखं, प्राणिनां तत्समानं;
चारित्रं विश्वसारं नु सकलगुणवतां, पूर्णविश्वासधाम ।।१२।। (स्रग्धराः)

**चारित्रस्मृतिः**

चारित्रस्य स्मृति कुमोहदलनी, प्रीतिप्रदं दर्शनम्,
स्पर्शं चाऽशिवनाशनं सुखकरं, यद्वन्दनं पूजनम्।
सेवा यस्य शुभानुबन्धसदना, संवेगभावप्रदा,
चारित्रं सततं महोदयफलं, सेवे मुदा श्रद्धया ।।१३।। (शा.वि)

**चारित्रभक्तिः**

चारित्रेण शुभः सदैव मधुरस्सौम्यः स्वभावो भवे-
दात्मा दुर्मददुष्टकर्मरहितश्चारित्रतस्संभवेत् ।
संसारे सुखमस्त्यपायबहुलं, तत्त्यागतः स्यात् सुखी ;
चारित्रं भज तं सखे! सुखकरं, सर्वोत्तमं सर्वथा ।।१४।।

**चारित्रे विविधोपमितिः**

जीवेभ्योऽभयदानकृत् त्रिभुवने, चारित्रमेकं श्रुतम्,
पापेभारिहरिः शमाद्रिशिखरं, चारित्रमुच्चैः स्मृतम् ।
स्वात्मानन्दसुधाद्रहं सुविमलं, चारित्रमेतत्सरः ;
चारित्रं प्रशमादिसद्गुणमणिश्रेणिस्थलीं संस्तुवे ।।१५।।

**चारित्रे वर्षाया उपमितिः**

चारित्रं शीलवर्षा प्रशमरससरः ,वर्धते यत्प्रभावात्,
यस्याः सद्दर्शनेनाऽपि भविजनमनः, केकिवन्नृत्यदास्ते ।
यस्याः धाराप्रवाहैश्च विमलविशदं, मानसं स्याद्यतीनां,
ज्ञानं ध्यानं च शस्यं विकसति मम सा, शीलवर्षाऽस्तु मुक्त्यै ।।१६।। (स्रग्धरा)

**चारित्रे हेमस्योपमितिः**

स्पृष्टं ध्यानाऽनलेन प्रकटयति सदा, स्वीयरूपं पवित्रम्,

दारिद्र्यं दुर्दशालिं विघटयति गुणैः, दोषदौर्भाग्यनाशि ।
श्रेयःसंपच्च यस्माद् विलसति नितरां, मानसे सन्मुनीनां,
चारित्रं भव्यकल्यं सकलगुणयुतं, शाश्वतं तन्ममाऽस्तु ।।१७।।

**चारित्रे मयूरस्योपमितिः**

सच्चारित्रं मयूरो जिनवचनघने-नैव हर्षं बिभर्त्ति,
भुङ्क्ते कर्मौघ-नागान भवविरहशुभाऽऽशामुखेनैव नित्यम् ।
शुद्धाचाराः कलापाः पुनरपि शुशुभे, मेचकस्तत्र मैत्री,
केकास्वाध्यायघोषो मम भवतु चिरं, श्रेयसे सैष केकी ।।१८।।

**चारित्रे अमृतस्योपमितिः**

यं पीत्वा विषयादितापशमनात्, शैत्यं भवेदात्मनि,
वैषम्यं विपुलं विभावजनितं, यस्माद् द्रुतं शाम्यति।
प्रत्नं कर्ममलं जहाति सहजा, तुष्टिश्च पुष्टिर्भवेत्;
तं चारित्रसुधारसं पिब सखे!, सत्तत्वतृप्तिप्रदं ।।१९।। (शा.वि.)

**चारित्रे संपत्तेरुपमितिः**

चारित्रं नव्यसंपद्, प्रकटितविभवा, क्वापि केनाप्यहार्या,
यस्यां सत्यां मुनीनां प्रशमरसनिधि र्वर्धते सर्वदैव ।
यत्संपद्-सद्व्ययेन शिवसुखनमघं, प्राप्नुयात् साधुवर्गः;
पुण्या संपन्ममैषा भवतु प्रतिभवं, स्वात्मसौख्याय बह्वी ।।२०।। (स्रग्धरा)

**चारित्रे भेषजस्योपमितिः**

चारित्रं भवरोगतानवकरं, स्वारोग्यदं भेषजम्,
दुर्भावादि गदावलिस्तनुतरा, सौख्यपरं स्यात्तथा ।

लावण्यं विलसेत् शुभं शममयं, धर्म्ये शरीरे सदा;
प्रौढं येन तवौज आशु प्रभवेन्नित्यं भजाऽऽत्मन्! मुदा ।।२१।।(शा.वि.)

**चारित्रे गुणमयपुरुषस्योमिति:**

वक्त्रं यस्य समर्पणं गुरुवरे, नेत्रे च शिक्षाद्वयी,
नासाऽऽज्ञाऽऽचरणा मताऽतिसरला, श्रोत्रे च धर्मद्वयी।
बाहू ज्ञानक्रियानयौ शिवप्रदौ, ध्याने कपोलावुभे;
वैयावृत्यकरौ करौ च चरणौ, विद्याविवेकाऽऽत्मकौ ।।२२।।
वात्सल्यं सकले जनेऽस्ति हृदयं, ग्रीवा हितेच्छा वरा,
मैत्री नाभिरदूषणा च रसना, तत्त्वाऽभिलाषा शुभा ।
वक्षस्सद्विनयोऽधरौ जिनवरे, सत्प्रीति-भक्त्यात्मकौ;
चारित्रं प्रवरः पुमान् गुणमयो, मन्मानसे भासते ।।२३।। (युगमम्)

**चारित्रे मङ्गलस्वस्तिकस्योपमिति:**

चारित्रं शिवराज्यलाभगमने, माङ्गल्यकृत्-स्वस्तिकः,
संसारारिपराभवाय बलदः, श्रद्धासुमैरर्चितः ।
आनन्दाऽक्षत-सप्तभङ्गिरचना, सौन्दर्य-चेतोहरस्-
तूर्णं मुक्तिप्रदस्सदैव हृदयेऽसौ स्वस्तिको नन्दतात् ।।२४।।

**चारित्रे कमलस्योपमिति:**

यस्य प्राणिगणे सदा प्रसृमरं, मैत्रीमृणालं वरम्,
सत्सु प्रीतिपरागसौरभभरं, शीलाङ्गपत्रावहम् ।
चारित्रं कमलं सतां हृदयहृत्, सच्छीलसौन्दर्यभृत्;
याचे वीर ! भवान् मनःसरसि तद्, मे स्मेरयत्वाऽऽशिवम् ।।२५।।

**चारित्रे प्रासादस्योपमिति:**

प्रासाद: प्रवर: सतां रुचिकर-श्चारित्रमस्ति ध्रुवम्,
नानासद्गुणरत्नराशिखचितै:, स्तम्भै: सदाऽऽनन्ददः ।
गुर्वाज्ञाऽऽचरणागवाक्षनिचयो, यस्मिन् प्रमोदास्पदम्;
तस्मिन् स्यान् मम चेतसो निवसनं, श्रेयस्करं सर्वदा ।।२६।।

**चारित्रे सागरस्योपमिति:**

चारित्रं सरितापतिस्सुखपय:पूर्णो गभीरो गुणै:,
''**सम्यग्दर्शन**'' -सङ्गहर्षलहरी-वैराग्यवेलाधरः ।
भक्ति-प्रीति-विमुक्तिमुख्यतटिनी-व्राताश्रयो विस्तृत:,
शश्वत्शान्ति-समाधितीर-रुचिरोऽसौ स्यान्ममा''ऽऽ**श्रेयसम्**'' ।।२७।।

श्रीदर्शनः

# श्रीसूरिमन्त्राऽष्टकम्

यो मन्त्रोऽमरराजपूजितजिनाऽऽस्याऽब्जेऽलिवद् राजते,
यन्मन्त्रस्य गणाधिराट् गुरवरः, श्रीगौतमो नायकः ।
यो मन्त्रो हितनाशिदुर्जनकृतप्रत्यूहनाशे प्रभुः;
र्मन्त्रः सूरिपतेरहो विजयते, सिद्धिप्रदः सर्वदा ।।१।।

यो मन्त्रो विपदांहरो बलकर, श्चौरारि-मारिहरः,
यन्मन्त्रस्य प्रभावतोऽनल-जलेभाद्या न हन्तुं क्षमाः ।
यन्मन्त्रं मुनिनायका अनुदितं, ध्यायन्ति हृत्पङ्कजे;
मन्त्रः सूरिपतेरसौ विजयते, सिद्धिप्रदः सर्वदा ।।२।।

यो मन्त्रो स्थिरतारसेन रसितैः, सूरीश्वरैः साध्यते,
यो मन्त्रो मुनिनाथवक्त्रकमलै, र्विष्वक् समाराध्यते ।
यन्मन्त्रे विनयं दधान मुनिपो, विश्वे सदा राजते;
मन्त्रः सूरिपतेरसौ विजयते, सिद्धिप्रदः सर्वदा ।।३।।

यो मन्त्रो भवपापतापशमनः, श्रेयोलतावारिदः,
यो मन्त्रो भवसिन्धुनाथमथने, देवाचलः प्राञ्जलः।
यो मन्त्रो स्मरणात् सदा सुखकरस्-तापत्रयीचन्दनम्;
मन्त्रः सूरिपतेरसौ विजयते, सिद्धिप्रदः सर्वदा ।।४।।

यो मन्त्रः शरणाऽऽश्रितस्य सुतरां, कार्यं विधत्तेऽखिलं,
यो मन्त्रो मरणान्तकष्टसमये, सद्यः समाधिप्रदः।
मन्त्रः शासनपद्मखण्डभ्रमरैः, संपूज्यते पूजितैः;
मन्त्रः सूरिपतेरसौ विजयते, सिद्धिप्रदः सर्वदा ।।५।।

यन्मन्त्रस्य जपप्रभाववशतः, स्यात् सूरिराट् प्रातिभः,
यन्मन्त्रस्य परः प्रभावतपनः, दुष्टाऽघपङ्कं दहेत् ।
यन्मन्त्रस्य गुणावलिं गणयितुं, कश्चिन्न शक्त्यान्वितः ;
मन्त्रः सूरिपतेरसौ विजयते, सिद्धिप्रदः सर्वदा ।।६।।

यन्मन्त्रस्य जपाद् भवेद् यतिपतिः, साक्षात् गुरु गौतमः,
यन्मन्त्रार्कविभाकरास्तनुभृतां, मोहान्धकाराऽऽहराः ।
यन्मन्त्रेण मुनीश्वरैः, सकुशलै सङ्घस्य धू रक्ष्यते ;
मन्त्रः सूरिपतेरसौ विजयते, सिद्धिप्रदः सर्वदा ।।७।।

ब्राह्मी स्यान्मम कामदा, त्रिभुवनादाऽऽह्वे परं स्वामिनी,
यक्षः श्री गणिपीटकाख्यबलवान्, भूयात् प्रसन्नो मयि ।
**सम्यग्दर्शन**संपदाऽऽत्मसुखदा, मन्त्रस्तवेनाऽस्तु मे,
भूयादात्महिताय संयमसुखं, शश्वन्ममाऽऽ**श्रेयसम्** ।।८।।

**पू.मुनिश्री प्रशमरक्षितविजयाः**

# चतुर्विंशतिजिनस्तुतिः

इक्ष्वाकुवंशे पुरुषप्रधान!, दत्ताष्टकर्माश्रवसत्पिधान!।
स्याद्वादसंशुद्धवचोविधान!, **चिरं जय ज्ञानकलानिधान!** ॥१॥ उपजातिः

त्रैलोक्यराजन्! गजराजलक्ष्मन्!, सुवर्णकान्त! क्षमया प्रशान्त!।
जिनाजितार्हन्! मम चित्तवृत्तं, **विज्ञ! प्रभो विज्ञपयामि किञ्चित्** ॥२॥

संसारवासे पतितः प्रमादाद्, मुक्त्यर्थमेवं न कृतः प्रयासः।
श्रीसंभवेश! बहु किं वदामि, **निजाशयं सानुशयस्तवाग्रे** ॥३॥

सर्वार्थवेत्तस्! त्रिपदीप्रणेतः!, श्रीसंघनेतः! ह्यभिनन्दनेश!।
सदा त्वदाशाऽकरणेन पूर्वं, **विभो! मया भ्रान्तमहो मुधैव** ॥४॥

नृनाकिनाथार्चितपादपद्म!, त्वां देवदेवं सुमते न भेजे।
धिङ्मां कुमत्याविलगाढचित्त-**जालेन बद्धोऽस्मि कथं भजेयम्** ॥५॥

निःशेषकर्मक्षयमुख्यहेतौ, मनुष्यजातौ न कृतोऽस्ति धर्मः।
पद्मप्रभो! जन्म हि मामकीनं, **जिनेश! जज्ञे भवपूरणाय** ॥६॥

पूर्णेन्दुकान्ते! विषयौघशान्ते!, सुपार्श्वनामन्! शिवसौख्यधामन्!।
न धारिता वाग् हृदि तत् कठोर-**मस्मादृशां देव! तदश्मतोऽपि** ॥७॥

चन्द्रप्रभो! चन्द्रपुरीप्रभो! भो!, चन्द्रांशुदेह! व्रतरत्नगेह!।
विना व्रतं हारितमेव जन्म, **कस्याग्रतो नायक! पूत्करोमि** ॥८॥

ज्ञानाद्यनन्ताधिप! पुष्पदन्त!, तत्वांशुसृष्टाविव पुष्पदन्तौ! ।
धर्मस्य कृत्यं न कृतं मया हा, **कियद् ब्रुवे हास्यकरं स्वमीश !** ।।९।।

निरीक्षिता दोषगणाः परेषां, दोषौघयुक्तात्मनिरीक्षणं न ।
श्रीशीतलाधीश! मयाऽबुधेन, **कृतं भविष्यामि कथं विभो!ऽहम्** ।।१०।।

त्वां विश्ववन्द्यं खलु वीतरागं, त्यक्त्वाऽन्यदेवः परिसेवितोऽस्ति ।
श्रेयांसदेवेश! कियद् वदेयं, **सर्वज्ञ! सर्वं स्वयमेव वेत्सि** ।।११।।

त्रिविष्टपाधीश सुरौघपूज्य!, विश्वस्य बन्धो ! प्रभुवासुपूज्य! ।
सांसारिकं शं तव भक्तिभावा-**दवाञ्छि ही नाथ! मतिभ्रमो मे** ।।१२।।

त्वद्ध्यानभङ्ग्या सुविरक्तचित्तान्, जयन्ति नो श्री विमलेश! भव्यान् ।
सर्वाङ्गसौन्दर्ययुताः समग्र-**कटीतटीयाः सुदृशां विलासाः** ।।१३।।

नानासुदुःखावह संसृतौ यद्, रागोग्रपङ्को मम कीदृशोऽयम् ।
अनन्त! नो त्वद्वचनोदधौ हा, **धौतोप्यगात्तारक! कारणं किम्** ।।१४।।

श्रीधर्मनाथ! त्रिजगज्जनेश!, धर्मोपदेशे त्वमपूर्वबोधः।
बोधो न कश्चित् मम धर्मशास्त्रे, **तथाप्यहंकारकदर्थितोऽहम्** ।।१५।।

वसुन्धराशान्तिद! शान्तिनाथ!, त्वन्नाममन्त्रो वरशान्तिमन्त्रः ।
न वन्दितं त्वच्चरणाम्बुजं यत्, **स्वामिन् महामोहविडम्बना मे** ।।१६।।

तमोभृतेऽहं पतितः कुमार्गे,दुःखौघयुक्ते सुपथादतीतः ।
त्रैलोक्यबन्धौ जिनकुन्थुभानौ, **परिस्फुटे सत्यपि देव! धिङ्मां** ।।१७।।

धर्मक्रिया नाऽऽचरिता मया च, नाऽऽराधिता शासनभिक्षुता ते ।
त्वां नाथमाप्याऽरजिनेश! नाथ!, **कृतं मयाऽरण्यविलापतुल्यम्** ॥१८॥

भवे श्रुतं नो जिन! पूतवाक्यं, चीर्णं न रत्नत्रितयं महार्घ्यम् ।
हतो न मल्लीश्वर! मोहमल्लो, **जिनेश! मे पश्य विमूढभावम्** ॥१९॥

दत्तं न दानं सुपवित्रपात्रे, शीलं तपो भावयुतं न दध्रे ।
श्रीसुव्रत! त्वत्सुगुणा न चित्ते, **व्यचिन्ति नित्यं मयकाऽधमेन** ॥२०॥

वित्तेषु लोभोऽरिजनेषु कोपो, यशस्सु मानः सुजनेषु माया ।
नमिप्रभो! भूरि कृतं ह्यकार्यं, **मया मुधा हारितमेव जन्म** ॥२१॥

नेमिप्रभो! श्रीयदुवंशजात!, नौकायमानेश! भवाम्बुधौ त्वम् ।
मह्यं प्रदेयाः शरणं विना तत्, **तार्यः कथंकारमयं भवाब्धिः** ॥२२॥

सर्वज्ञ! सर्वाधिकपुण्यसंपत्!, सर्वार्थनिस्तीर्णक ! सर्वदर्शिन्! ।
पार्श्वप्रभो! ते चरणं श्रयामि, **भूतोद्भवद्भाविभवत्रयीश!** ॥२३॥

श्रीवीर! प्राप्नोमि परां तवाज्ञा-मामुक्तिलाभं परमेप्सितां ताम् ।
सर्वं ममास्ते विदितं त्रिविश्व- **निरुपकस्त्वं कियदेतदत्र** ॥२४॥

श्रीमत्सूरिप**रामचन्द्र**शिशवः, **श्रीमुक्तिचन्द्रा**भिधास्-
तत्पट्टे **जयकुञ्जरो** मुनिपतिस्-तत्सेवि**मुक्तिप्रभः** ।
तत्सेवी **प्रशमाभिधो** लघुशिशुः, स्तुत्वा जिनान् सद्धिया,
श्रीरत्नाकर! मङ्गलैकनिलय!, श्रेयस्करं प्रार्थये ॥२५॥

**(कृतिरियं पादपूर्त्तिरस्ति रत्नाकरपञ्चविंशतिकायाः)**

मुनिश्री दर्शनरक्षितविजयाः

# वन्दे श्री वीरम्

## (वन्दे मातरम्-रागेण गीयते)

वन्दे श्रीवीरम्, वन्दे श्रीवीरम्,
परमात्मानं परमेष्ठिनं,
परम सुखदं, सुषमदायकम्...श्री वीरम्
पुरुषोत्तमं, पुरुषसिंहं,
पुरुषवरगन्धहस्तिनम्... श्री वीरम्
धर्मदेशकं, धर्मनायकं,
धर्मतीर्थप्रवर्तकम्... श्री वीरम्
सर्वज्ञं च सर्वदर्शिनं,
सकलकर्मविनाशकम्... श्री वीरम्
जगदीश्वरं, जगत्सुभास्वरं,
जगति सर्वदुःखौघविदारकम्...श्री वीरम्
लोकोत्तमं, लोकप्रदीपकं,
लोकोत्तरशासनस्थापकम्... श्री वीरम्
निःसङ्गं च, निरामयं,
निजपरेतिविचारविनाशकम्... श्री वीरम्
विश्वेश्वरं, विबुधेश्वरं,
विजय**मुक्तिपथ"दर्शनम्"**... श्री वीरम्

मुनिश्री संयमभूषणविजयः

# रांतेजतीर्थसरस्वतीस्तवना

वाग्देवि! सर्वदा वाचं, मदीयां सफलीकुरु ।
स्याज्जिनोत्कीर्त्तनार्था, गीस्तदा सा सु-फला भवेत् ॥१॥ अनुष्टुप्

त्वत्कृपा-पुञ्जप्राप्तानां, शुभ्रं यशो महात्मनाम् ।
दशदिक्षु न संमाति, कृपालु र्भव मय्यपि ॥२॥

श्रुतं लोके भवेत् सिद्धिस्त्वन्नाम्न एकजापतः ।
मया तूच्चारतः प्राप्ता, सिद्धि र्नास्त्यत्र संशयः ॥३॥

"ऐं नमः" इति मन्त्रोऽयं, जप्यते सर्वदा मया ।
भवेयं ऐंमयो शीघ्रमाशी, र्देहि कृपामयि! ॥४॥

शारदेति श्रुता लोके, सारदा भव मय्यपि ।
गूढार्थोऽपि महाग्रन्थः, कृपया सरलस्तव ॥५॥

श्वेताम्बरधरा भाति, श्वेता हंसस्य सदृशी ।
श्वेतहंसासना माता, श्वेतमालोपसंङ्गिनी ॥६॥

मदीयां प्रार्थनां मातः, स्वीकुरु भावतः कृताम् ।
मन्मुखे कुरु संवासं, यावच्चन्द्रदिवाकरौ ॥७॥

जाग्रती भक्तवात्सल्या, तीर्थ-**रांतेज**-राजिता ।
कृपया तव संबद्धं, स्तोत्रमिदं सुखावहम् ॥८॥

मुनिश्रीश्रुतसुन्दरविजयाः

## सारम् सारम्

जैनेन्द्रधर्मकरणे मनुजत्व**सारम्**,
सौहार्दपूर्णचरिते श्रमणत्व**सारम्** ।
आज्ञानुगे निजगुरोश्च शिशुत्व**सारम्**,
प्राप्तौ शिवस्य सततं वरसौम्य**सारम्** ।। (व.ति.)

अस्माकं निगोददुःखेभ्यः या मुक्तिः,
तस्यां सिद्धभगवत उपकार एव **सारम्** ।

आत्मनि सद्गुणप्राप्तौ
गुणिजनानां गुणस्तुतिरेव **सारम्** ।

अपरेषां क्षतिसहने
सागर इव वरगाम्भीर्यमेव **सारम्** ।

मिथ्यान्धकारस्य नाशे
मोहनीयकर्मक्षीणतैव **सारम्** ।

कल्पद्रुमकल्पसम्यक्त्वप्राप्तौ
देव-गुरु-धर्मेषु निश्चलश्रद्धैव **सारम्** ।

आत्मगृहे प्रदीपोपमपञ्चमहाव्रतरक्षणे
संसारिकजनपरिचयमहावातवर्जनमेव **सारम्**।

सर्वज्ञप्ररुपितसर्वगुणप्राप्तौ
सर्वोत्कृष्टसौम्यमेव **सारम्** ।

सा.श्री क्षमानिधिश्री

# निःश्रेयसं शब्दाऽनुप्रेक्षणम्।

तपागच्छाधिराज-जिनशासनालंकार-भवजलनिधितारक-कुमतमातङ्ग-मदवारक-दीक्षायुगप्रवर्त्तक-मिथ्यात्वनिवर्त्तक-सम्यग्दर्शनदायक-सुविशाल-गच्छनायक-व्याख्यानवाचस्पति-श्रीमद्**विजयरामचन्द्रसूरीश्वराणां** संयमस्वीकार-शताब्दीसंवत्सरेऽस्मिन् प्रकाशमानमिदं ''**निःश्रेयसम्**'' संस्कृतपत्रमस्ति।

अस्याऽभिधानं निःश्रेयसमिति कथं कृतम्? इति जिज्ञासा सहृदयसुहृदां भवेदेव।

सर्वेषामास्तिकदर्शनानां आत्मा-पुण्य-पाप-मोक्षास्तित्वं मान्यमस्ति, सर्वेषां धर्माणां मोक्षश्चततोऽस्य परिपत्रस्य **निःश्रेयस**मभिधान कृतं यतोऽस्य शब्दार्थो मोक्षो भवति। किन्त्वस्य निःश्रेयसशब्दस्य व्युत्पत्त्या तु नैके अर्था भवन्ति।

तथाहि-निष्पन्नं-सिद्धं श्रेयसम्-कल्याणमिति निःश्रेयसम्। इति निसा उपसर्गेण सहितो श्रेयस् शब्दोऽत्राभिधाने वर्तते। श्रेयस्शब्दस्य च बहवे अर्था भवन्ति-श्रेष्ठं, प्रधानं, सुकृतं, शुभं, पुण्यं, धर्मं, कल्याणं, मोक्षश्चेति हैमी-अभिधानचिंतामणि नाममालायाम्। निःश्रेयसशब्दस्य च मोक्षाऽर्थो भवति ततः 'श्रेयस्' शब्दस्य सर्वेऽर्थाः निःश्रेयसं-मोक्षं प्रति निःश्रेणि तुल्या सन्ति इति मम भाति।

तथाहि-श्रेयः-सुकृतं-शुभानुष्ठानं तेन जीवः श्रेयः-पुण्यं तस्यार्जनं करोति तच्च पुण्यं द्वेधा भवति पुण्यानुबन्धि पुण्यं, पापानुबन्धि पुण्यश्च, श्रेयः-प्रधानं प्रधानद्रव्यक्रिया पुण्यानुबन्धिपुण्योपार्जनं जीवः करोति तदेव श्रेयः-शुभं पुण्यं कथ्यते तेन जीवः श्रेयो-धर्मः तस्यानुकूलानि स्वजनधनादिनि प्राप्नोति तेन श्रेयः-श्रेष्ठः-वस्तुस्वभावात्मकः-धर्मो प्रादुर्भवति स च शुद्ध-भावनात्मकस्तेन जीवश्चिन्तयति यथा धर्म एव आचरितव्यो, धर्म एव शरणम्, धर्म एव त्राणः धर्म एव सद्गतेः सातत्यमर्पयति परिपूर्णो धर्म एव मोक्षं ददाति।

मोक्षोऽर्थात्बन्धनान्मुक्तिः। कीदृशाद् बन्धनान्मुक्तिः ?

संसारात्मकबन्धनान्मुक्तिः। संसारस्तु किंरुपः ? संसारो द्वेधाऽस्ति जन्म-मरण-

विविधभवभ्रमणात्मको बाह्यसंसार:। विषय-कषाय-राग-द्वेष-मोहात्मकस्तु अभ्यन्तरसंसार:।

अस्माकमात्माऽनादिकालत: कर्मणा मृत्सुवर्णवत् सम्बद्धोऽस्ति स च कर्म द्रव्यात्मक-संसार: अयं द्रव्यसंसार: रागद्वेषात्मकांतरसंसारेण विवर्धते-पुष्टिं बिभर्त्ति।

कर्मपोषेण जीवस्य जन्म भवति यस्य जन्म तस्यावश्यं देहो भवति देहधारी जीवस्य स्वजनै: पदार्थैश्च सम्बद्धो भवति ततो जीवस्तेषामुपरि ममत्ववान् भवति-स्वानुकूले-रागं बिभ्रति-प्रतिकूले-च द्वेषं बिभ्रति तत अभ्यन्तरसंसारो पोषं धत्ते।

तेनात्मा मलिनो भवति तत: सम्यग्दर्शन-ज्ञान-चारित्रात्मकस्वभावत आत्मा परिभ्रष्टो भवति। ततो जन्म, ततो मरणं, एवं जन्ममरणादविरमणं संसार: एतादृक्संसारतो मुक्ति: मोक्ष: एवं नि:श्रेयसार्थो परिभावितोऽस्माभि:।

स च सम्यग्दर्शन-ज्ञान-चारित्राणां संपूर्णतया प्रादुर्भवेन भवति ततोऽस्माभि क्षायिक-दर्शन-ज्ञान-चारित्रप्रापणायैव सततं प्रयास: कर्तव्य इति प्रज्ञप्तं विदितसिद्धान्तपरमार्थै:, ज्ञातसंसारस्वभावै: परमर्षिभि: क्षायिकसम्यग्दर्शन-ज्ञान-चारित्रात्मको मोक्ष: शीघ्रं प्राप्नुयाद् इति आशासे इति शम्।

सा. विरागदर्शनाश्री

# श्री सरस्वत्यष्टकम्

ऐन्द्रव्रातनता सुसाधुमहिता हंसासने संस्थिता,
नानाभूषणभूषिता-तनुलता-सौन्दर्य-संशोभिता ।
भव्यानां सुखदा सुबुद्धि-गुणदा, सौभाग्य-सद्भाग्यदा;
सा देवी मम शारदा सुवरदा, विद्यां ददातु सदा ।।१।।

ज्ञानानंदकरीं सदा शिवकरीं, श्रेयस्तरोर्मञ्जरीं
बुद्धि-स्थैर्यकरीं भवार्णवतरीं, ऐंकारमंत्राक्षरीम् ।
अज्ञानारिविजित्वरीं सुखकरीं, मालाविपञ्चीधरीं;
सम्यग्दर्शनशंकरीं शुभकरीं, तां स्तौमि वागीश्वरीम् ।।२।।

श्री वाग्देवतया सदा जडजनाः, प्राज्ञीकृता धीरया,
उन्मार्गाः सकला रयात् कुशलया, प्रोन्मूलिता लीलया।
श्रीमद्शारदया पुरा कविवरा, जाताः प्रभूता यया;
सा देवी हि सरस्वती भगवती, भूयात् प्रसादालया ।।३।।

सूर्याभासमदेहकान्तिप्रवरे!, तुभ्यं नमः सर्वदा,
गोक्षीरेन्दुतुषारतुल्यधवले!, तुभ्यं नमस्ते मुदा ।
मिथ्यासंशय-भ्रान्तिशैलकुलिशे!, तुभ्यं नमः शारदे!;
उन्निद्राम्बुजपर्णवत्सुनयने!, तुभ्यं नमः कामदे! ।।४।।

सप्तार्चिस्तु हिमायते भगवती-देव्याः कृपादृष्टितः,
पृथ्वी चैव -दिवायते खलु रिपु, र्मित्रायते तत्त्वतः ।
हस्ते संस्थितवस्त्विवाखिलजगत्, द्राग् लोकते मन्दधीः;
स्यां त्वत्तस्तु जडापि काव्यकुशला, गीर्देवि! संशुद्धधीः ।।५।।

त्वन्नामस्मरणं विपत्तिनिचयस्तम्बेरमाष्टापदं,
त्वत्कल्यं शरणं सदासुखकरं, कल्याणमालाप्रदं।
त्वत्कम्रं स्तवनं कुकर्मशमनं, सद्‌बोधिरत्नप्रदं;
त्वत्पुण्यं नमनं भवभ्रमहरं, कैवल्यश्रीसिद्‌धिदं ॥६॥

अर्हद्‌वक्त्रसरःशुभाङ्गकमला-पूर्वाम्बुजैर्राजिता,
विश्वेषां सुधियां धियां विमलता-दात्री गणीन्द्रार्चिता।
त्वन्मन्त्रं मनुजो दधाति शिवदं, योऽज्ञोऽपि वाग्देवते!;
स द्राग् प्रीणयते स्फुटं नृपगणान्, चाटूक्तिभिर्देवते ! ॥७॥

वक्तुं ते नहि सक्षमो गुणगणान्, वाचस्पतिः शारदे!,
त्वद्‌भक्त्या तदपि स्तुवे सुवरदे!, मूढाप्यहं शारदे!।
मा त्याक्षीः हि कदापि देवि! मम वै, हृन्मन्दिरं नाथये;
त्वत्स्तुत्यास्तु **विरागभावप्रवरः**, **श्रेयस्पदं** प्रार्थये ॥८॥

सा.श्री दिव्यरत्नाश्री

# सरस्वतीस्तुत्यष्टकम्

प्रणम्य परमात्मानं, कृत्वा सद्गुरवे नतिम् ।
क्षायिकज्ञानलाभाय, स्तुवे देवीं सरस्वतीम् ॥१॥

मरालवाहनां श्वेत-दिव्यदुकूलधारिणीम् ।
प्रवरां देहकान्तिं तां, स्तुवे देवीं सरस्वतीम् ॥२॥

विभासिपद्मपत्राक्षीं, पूर्णचन्द्रसमाननाम् ।
सुधापात्रधरां हस्ते, स्तुवे देवीं सरस्वतीम् ॥३॥

गुरोर्मुखाम्बुजे हंसी-मर्हदानन-नर्तकीम् ।
मनस्विनां मनोहर्त्रीं, स्तुवे देवीं सरस्वतीम् ॥४॥

हृदि धत्ते वचो जैनं, मस्तके शासनं तथा ।
शास्त्रपत्रं करे धर्त्रीं, स्तुवे देवीं सरस्वतीम् ॥५॥

सूरिमन्त्रस्य जापे याऽधिष्ठात्री प्रथमे पदे ।
मूर्खं सारस्वतीकर्त्रीं, स्तुवे देवीं सरस्वतीम् ॥६॥

वर्षत्यनुग्रहं नित्यं, श्रद्धावति जने मुदा ।
काव्यशक्तिं परां दत्ते, स्तुवे देवीं सरस्वतीम् ॥७॥

यस्याः प्रभावतो ज्ञानाऽवरोधिकर्मणां क्षयः ।
''**दिव्य**''**श्रेयस्पदं** याचे, शारदे! त्वत्स्तवैरहम् ॥८॥

सा.श्री चिन्तनप्रियाश्री

# चारित्रस्वरूपाष्टकम्

सदाऽऽनन्दं सदाऽशोकं, सदाऽऽत्मरमणं परम् ।
भूयाद् गुरुकुलावासे, ज्ञानाब्धौ मज्जनं मम ।।१।। (अनुष्टुप्)

रक्तः परिजनोऽत्र नो, नाऽत्र च कोऽप्यरिव्रजः ।
नास्ति भयं न पापानि, नास्ति रोग-चिकित्सनम् ।।२।।

प्रासुकोदक-भोज्यार्थ-मेषणा स्याद् गृहे गृहे ।
समस्तजीवराशीनां, रक्षणं च क्षणे क्षणे ।।३।।

धरायां शयनं नित्यं, सदैकभक्त भोजनम् ।
जिनाज्ञाराधनं नित्यं, नित्यं सद्गुरुसेवनम् ।।४।।

त्यजनं सर्वसङ्गस्य, मोहाद्यरेरपोषणम् ।
छेदनं दोषजालस्य, क्षमादिगुणपोषणम् ।।५।।

नाऽऽधाकर्मादिदोषाद्यैःर्युक्ताहारेण जीवनम् ।
पृथ्वी-वार्-वह्नि-वात-द्रु,-हिंसनं न कदापि हि ।।६।।

प्रतिक्षणं विना दोषं, पञ्चाचारस्य पालनम् ।
अष्टप्रवचनमात्-रत्नत्रय्याश्च सेवनम् ।।७।।

निर्वृतिदायकं मे स्यात्, क्रियाकदम्बकं परम् ।
मच्चित्तं तत्र रक्तं चेत्, चरित्रं तन्मनोहरम् ।।८।।

पं.अमृत पटेलः

# श्री शान्तिजिनद्वात्रिंशिका

श्री नाथ शान्ते! भवकर्मशान्त्यै, शाऽन्तो ननु त्वं करुणासुधांशो! ।
भवार्त्तिसंतप्तमथात्मदासं, दृष्ट्वाऽथवा नाथ! किमत्र वच्मि? ॥१॥

कथाप्रथा ते यशसो जगत्यां, कृथा कथं नाथ ! तथाविधेषु ।
पृथुं दयां तेऽनुदिनं दयन्तेऽ, नादीनवास्ते भवता कृतार्थाः ॥२॥

शुभाऽनुभूतिर्जिन! ते प्रसत्तेस्-तव प्रसत्ति र्मम शुद्धभावात् ।
भावश्च शुद्धस्त्वदुपज्ञधर्माद्,धर्मस्त्वहिंसैव, परो न शान्ते! ॥३॥

हितं यदात्मन्नीहसे परं त्वं, जानीहि शान्ते र्हि कृपा पराऽऽप्ता ।
निदाघकाले शशिनो हि शैत्यं, भवे मरौ शान्ति कृपा, ममाऽऽस्था ॥४॥

आश्रित्य शान्तिं किमु पापपङ्कं?, सदार्हति ध्यानलयं श्रयस्व ।
ध्यातः श्रितानामिनशान्तिदेवो, दिव्यं तनोत्युज्ज्वलमात्मरत्नम् ॥५॥

ततार शान्ते! तव सार्व! सत्त्वं, सर्वेषु सत्वेषु समत्वकारि ।
नक्तं दिनं येन मनोऽतिशुभ्रं, शुभं च शुद्धं च शुभानुबन्धि ॥६॥

यत्राऽपि तत्रापि सदापि चेतः, समत्वमत्युल्लसितं सुभावात् ।
समत्वसिद्धे र्जिनभक्तिलाभः, समत्वसिद्ध्यै भज शान्तिदेवम् ॥७॥

स्वस्मिन् समागच्छ परित्यजाऽन्यत्, तदर्थमात्मन्ननु शास्मि प्रेम्णा ।
शान्तिं भजस्वात्मगतं स्वभूतं, सिद्धिर्हि शुद्धेः किल साधनस्य ॥८॥

त्वयि प्रशान्ते सकलं प्रशान्तं, माऽऽत्मन् विधास्त्वं कलुषं निजत्वम् ।

नितान्तशान्तिप्रदमाचिरेयं, शान्तिं जिनं शान्तिनिशान्तमेहि ।।९।।

भग्ने तु पोते सुतरो न वार्धि-च्छिद्रे तु जाते नहि पोतकृत्यम् ।
शान्तीश ! पोतं हि परं तवाज्ञा, न यत्र भेदश्च नयत्र! छेदः ।।१०।।

अपार! शान्ते! त्वमपारशान्तेर्, नितान्तमत्युत्तमधाम सारम्।
प्रशान्तवाही त्वमसीन! शान्ते!, प्रशान्तवाहित्वमपि त्वयैव ।।११।।

बहुश्रुता एव वदन्ति तत्वं, तत्वं त्वमेवेति मया श्रुतं तत्।
शान्ते! त्वमेवाऽथ शिवैकतत्त्व, मतः श्रितस्त्वां सकलात्मसत्त्वम् ।।१२।।

क्लिश्नाति कृत्स्नं किल कर्मरक्षो, मां नित्यमेवं दुरितैरवद्यैः ।
शान्ते! तवाऽऽख्या किल विश्वशर्मन्!, करोति सौख्यं दुरितापहारिन् !।।१३।।

विश्वेन! विद्धो विषमायुधेन, नैकेन पञ्चेषुभिरीश! तिग्मैः।
हे विश्वसेनाऽऽत्मज! विश्वसेन!, (1) रक्षाऽचिरानन्दन नाथ! शान्ते ! ।।१४।।

त्वदास्यमग्नं मम नेत्रयुग्मं, मनस्तवाराधनमग्नमेव ।
विरागभावो न तथा भवेऽस्मिन्, मोहादिमाद्यद्रिपुभि र्हतो हा ।।१५।।

सद्योगचक्रं तव धर्मचक्रं, सद्योऽघचक्रं भवहेतुचक्रम् ।
छिन्दन्ति भक्तिप्रतिपत्तिमत्सु, नाथा हि दासार्थविधौ प्रगल्भाः ।।१६।।

पणायितेनाऽथ मयीश ! सत्य-संधेन रक्षां करुणैकभावात् ।
जगद्द्रुहः किं मम मोहमुख्या, द्रुह्यन्ति भीतास्तव नाथकृत्यात् ।।१७।।

(1) विश्वरक्षणाय सेना बाह्याऽभ्यन्तरपरिकर इति,
यस्य स विश्वसेनः, तत्संबुद्धौ हे विश्वसेन!।

क्लिश्नामि कृत्स्नं विषयी कषायै-रहोनिशं कामगुणेषु लुब्धः ।
लुब्धस्य जालेषु यथैणबालो, बद्धः सुमुग्धो लभतेऽतिपीडाम् ।।१८।।

एनो मनो मे मलिनं करोति, कन्दर्पजातं च कषायजातम् ।
मृगाङ्कलक्ष्मन्! कुरु मेऽन्त इन्दु-सुधांशुधौतं प्रशमप्रशान्तम् ।।१९।।

मत्तो न मत्तो जगतीश! शान्ते!, लिप्तं च लुप्तं मम चित्तवित्तम् ।
दोषाः परेषां मम चित्तमेत्य, कुर्वन्ति दुष्टं किल कष्टमेतत् ।।२०।।

मनोऽपमालिन्यमनन्यभक्तेः, सा स्याज्जिनोक्तीन्दुविभाविलासात् ।
मोहारिजातं बहुधापकार-माप्तागमस्ते, तमपाकरोति ।।२१।।

कर्माणि मां नाथ! विना कृपां ते, निघ्नन्ति नित्यं तव भक्तिनिष्ठम् ।
सत्यं हि लोके किल नाथहीनाः, भवन्ति नित्यं बहुदुःखभाजः ।।२२।।

गुणास्त्वदीयाः कति? कीदृशास्? तद्, ज्ञातुं कथं नाथ! भवेयमीशः ।
चैतन्यविज्ञेयगुणास्त्वदीया, अहं तु चैतन्यविमुक्तयोगः ।।२३।।

पश्यन्ति सत्यं मुनयः स्तुवन्तस्-तत्त्वं तवोपज्ञमहो महाऽन्तम् ।
त्वां तेन संप्राप्य सुधां पिबन्ति,जगज्जनीना तव वाक् हि शान्ते ! ।।२४।।

नश्यन्ति दुःखानि तु कर्मजानि,न श्यन्ति सौख्यानि सुधर्मजानि ।
इतीश! ते वाग् जिनशान्तिदेव!,सुधाति संमोहविषाक्तलोके ।।२५।।

लब्ध्वाऽपि मानुष्यमलभ्यमत्र कषायचाण्डालविडम्बितोऽस्मि ।
शक्तिः शुभैकाऽत्र तवेश! गोत्रे, श्रितस्तवाह्रिं जिनचन्द्र! शान्ते! ।।२६।।

किञ्चिन्न शश्वत् सरितामिनेऽम्बु-चलाचलेऽत्राचलवत्तरङ्गे ।
वाचं विहायेश ! सुधामुचं ते, तया हि मत्त्वं भवतीह शश्वत् ॥२७॥

सदा चिदानन्दमयी प्रसत्तिस्-त्वद्भक्तियोगेन ममाऽस्तु लभ्या ।
तयाऽघजक्लेशदवाग्निकीर्ण-ज्वालाऽवलीढं शममेतु चित्तम् ॥२८॥

अनाप्ततत्त्वाः शुभसत्त्वलाभे, भवन्ति भव्यास्तव तत्त्वभाजः।
शान्तीन! नित्यं मम तेन कृत्यम्,विध्वस्तकर्मन्! रिपुकर्म कृत्त्वा ॥२९॥

भक्ति र्हि बीजं शिवकल्पवृक्षे, भक्तेः परं किञ्चन नैव रम्यम् ।
भक्त्या हि पारं भवसागरस्य, प्राप्नोमि, नाऽन्यत्र ममास्ति सक्तिः ॥३०॥

सङ्घश्चतुर्धा वृषभोऽनघश्च, त्वयेश! क्लृप्तः परिकर्मितश्च ।
कल्याणकायो निखिलात्मजातौ, तुभ्यं नमो मुक्तिप्रदाय शान्ते ! ॥३१॥

प्रातः स्तवं तव नवं स्तवनं विधाय, शान्तीश! नाथ! प्रभवामि परात्म-शान्त्यै ।
इत्थं शुभाभिलषितं मम पूरयेश !, वर्षं कृपाऽमृतमहर्निशमाचिरेय! ॥३२॥

(वसन्ततिलका)

अध्यापक श्री तन्मय शाह-मुंबई

# स....... कथमुच्यते

यः स्वदारातिसंसक्तो, जनन्यै दुःखदायकः ।
यया गर्भापीडा सोढा, स **पुत्रः** कथमुच्यते ॥१॥

जागतिकसुखावाप्त्यै, भोगेच्छु र्मानवे भवे ।
दुर्गं भवं मन्वानो यः, स **ज्ञानी** कथमुच्यते ॥२॥

धनाय शपते धर्मं, नेताऽधर्मेऽन्यमानवान् ।
अज्ञानीव स भावानां, **बोधिता** कथमुच्यते ॥३॥

शास्त्रं ज्ञात्वाऽपि यः पापा-न्नप्रतिक्रामति ध्रुवम् ।
यतते न तदर्थं स, **पण्डितः** कथमुच्यते ॥४॥

प्राणिनोऽपि म्रियमाणान्, यः शक्तावपि न रक्षति ।
नेत्रे मीलते यस्य स, **दयालुः** कथमुच्यते ॥५॥

रणे हेतिप्रहारान् यो, वीर्येण सहते परम् ।
क्लीबो यः स्त्रीकटाक्षैः स्यात्, स **वीरः** कथमुच्यते ॥६॥

परतप्तेः श्रुतौ नित्यं, कृतौ मुदोद्यतश्च यः ।
कर्ण-जिह्वासुप्रयोग-**कर्त्ता** स कथमुच्यते ॥७॥

परेषां दोषद्रष्टा यः, स्वगुणोत्कर्षतत्परः।
गुणरागं न धत्ते स, **गुणेच्छुः** कथमुच्यते ॥८॥

ज्वरे जलं पिबन्मौद्गं, वैद्याज्ञया तु केवलम् ।
नाऽत्ति मिष्टं वरं भोज्यं, **त्यागी** स कथमुच्यते ॥९॥

पुण्योदयात् श्रियं प्राप्तां, प्रवर्त्तयेच्छुभे न यः ।
नयोज्झितस्तु लक्ष्म्याः, **'स्वामी'** ति कथमुच्यते ॥१०॥

स्वसन्ततेः परलोकं यो, वृद्धः सन्न चिन्तयेत् ।
स तु सन्ततेस्तस्याः, **हितैषी** कथमुच्यते ॥११॥

योऽन्यशिक्षाविचक्षणो दक्षो न निजशिक्षणे ।
नाऽऽत्माऽऽचारेऽस्ति यस्य, स **देशकः**कथमुच्यते ॥१२॥

आत्मस्वरूपं विस्मृत्य, शरीराय प्रयस्यति ।
आत्मनोऽनश्वरत्वस्यऽ**ज्ञाता** स कथमुच्यते ॥१३॥

आत्मस्थं ज्ञान-दर्शन-चारित्रं प्रोज्झ्य मोहतः ।
लोलां लक्ष्मीमनुगच्छत्, **धीमान्** स कथमुच्यते ॥१४॥

यः स्वपराऽऽत्महिताय यतते न यथाबलम् ।
जिनाज्ञाविसंवादी यः, **सुसाधुः** कथमुच्यते ॥१५॥

धर्मे धियं धरन् धीरः, धृत्या परान् धारयन् ।
जिनाज्ञावशवर्त्ती यः, **सर्वगुणः स उच्यते** ॥१६॥

आचार्यश्री विजय पूर्णचन्द्रसूरिवराः

# संस्कृतम् संस्कृते मूलम्

अथैकदिने दिनेश्वरकरप्रकरकुङ्कुमविलिप्ताङ्गने गगने नितरां प्रबोधिते च प्रेम्णा पूर्णैस्तूर्णं दिनकरेण करैर्नागरे जानपदे च, समापिते प्रातःकृत्ये, मन्त्रीश्वरो वस्तुपालः सुखासने सुखमासीनः, सर्वे च कार्यभारिणः कर्मकराश्चागताः, तदा तत्रैकः चारणः परिकर्मितशिष्टाचारः शारदाप्रसादलब्धोत्कृष्टमतिवैभवः आगत्य, मन्त्रीश्वरं च नमस्कृत्य सुजनसुलभां प्रसत्तिं चानने पुरस्कृत्य, वस्तुपालं महामन्त्रीश्वरं 'सङ्घपतिस्त्वं, पुण्यवानसि, हे सङ्घपते! जय, नन्द, वर्धस्व च समृद्ध्या इति समाकर्ण्य च दत्तकर्णाः सकर्णाकीर्णाः सभाजनाः गगनंभरि हर्षारावं चक्रिरे। वस्तुपालस्तु समाकर्ण्य तां निजप्रशस्तिं निदध्यौ-अहो! ......बालिशताऽस्य चतुरस्यापि चारणस्य, यद् माम् 'सङ्घपतिं' निवेदयति। अतोऽप्रसन्नीभूय नेत्रे कारिमकोपरक्ते विधाय चारणमवोचत्-चारणवर! महानयं सङ्घः क्व, क्व चाहं सङ्घचरणरजो भवनायाप्यपात्रम्। इत्थं सङ्घपतिबिरुदं न जातुचिद् ममोचितम्। स्तुतिरियं मे मिथ्यास्तुतिरस्ति, ममैवं मिथ्यागुणस्तुत्या भवाँस्तु दोषभाजनम्, यद्यहं भवन्तं नोपालम्भे, तर्ह्यहमपि विशेषतरं दोषभाजनं भवामितराम्। त्वमद्यैवास्मिन् क्षणैव क्षमय, मह्यं प्रयुक्तमेतद् विशेषणं परावर्तयस्व।

मन्त्रीश्वरस्य रक्तनयनमेवमाक्रोशवचनं श्रुत्वा चारणो भीतः। तेन तु सङ्घपतिरिति स्तुतिर्वस्तुपालस्य व्याख्यतार्थैव विहितास्ति, किंतु 'समय वर्ते सावधानः' इति मत्वा प्रत्युत्पन्न-मतिमाश्रित्य सचातुरिकमुवाच चारणः महामहिममन्त्रीश्वर! नेदं साम्प्रतमुक्तवान् भवान्, मया भवतः 'सङ्घपति' स्तुतौ तत्पुरुषसमासो न समाश्रितः-यथा भवतोक्तं तथा सङ्घस्य पतिरिति नात्र समर्थोऽर्थः, किन्तु 'सङ्घपति' इत्युक्तौ तु मया बहुव्रीहिसमासेन 'सङ्घः भवतां पतिः, भवांस्तु सङ्घस्य सेवासमासीनः समीचीनतमः सेवकः इति प्रोक्तम्। नेदं चेष्टं किं भवतां मयोक्तम्? भवन्तस्तु गीर्वाणवाणीविचक्षणाः, नर-नारायणानन्दप्रमुख महाकाव्यकर्तारश्च। अतो मया भवतां संस्कृतभाषायाः प्रौढं ज्ञानमनुलक्ष्य, 'सङ्घपति-' प्रमुखेषु तत्पुरुषोऽतिप्रसिद्धः, किन्तु तेष्वेवपरेषु बहुव्रीहिविवक्षया

त्वर्थोन्यपुरुषपदप्रधानो भवति। अतो मया सङ्घो भवतां स्वामीति कथितः, अतो भवतामखिलं जीवितं सङ्घस्य सेवायै समर्पितम् तेनैवाहमवदम् यद् 'भवान् सङ्घपतिः इति। भवन्त एव न्याय्यमुच्यतां समीचीनं विचार्य, ततः चारणस्य वाक्चातुर्येण मन्त्रिराडपि मौनमाश्रितवान्। सर्वत्र चारणचातुर्यचमत्कृतचेतसो जनाः सप्रीतिदानं संस्कृतभाषायाः समासप्रक्रियायाः सामर्थ्यं विदाञ्चक्रिरे।

श्रूयतां भो! भो! भोः पारिषद्या! मतिभाजना! इत्युदितं मन्त्रीश्वरेण,

ततः पर्षदि निर्मक्षिकम् जातम्। धीरध्वनिना प्रोचे मन्त्रीश्वरेण यद्-समग्रभाषासु संस्कृतभाषायां तथा प्राकृतभाषायां समासादि प्रशिष्टं प्रकृष्टं समर्थार्थं वर्तते। यथाऽत्र 'सङ्घपतिः' अर्थान्तरे प्रयुक्तः तथाहं अत्र 'जितेन्द्रिय' इति शब्दमपि समासद्विकेन विवृणोमि। येन द्वौ विरुद्धावर्थौ भवतां मानसं मरालवत् हर्षतरङ्गितं करिष्यतः। यथा 'जितानि इन्द्रियाणि येन सः'-य इन्द्रियाणि जित्वा संसारसागरपारमवाप, अन्यश्चार्थः 'जितः इन्द्रियैः यः' इति-य इन्द्रियार्थेषु लुब्ध्वा पराभवमाप्य संसारसागरे न्यमज्जत्। इत्थं समाससामर्थ्यात् शब्देषु श्लेषकरणाद् इत्यादिप्रमुखसाधनमाध्यमात् संस्कृतभाषा समर्था संप्रवर्तते। अतो हि संस्कृतभाषा 'भाषाणां जननी' इति प्रशस्यते प्राज्ञैः।

संस्कृतभाषायां निबद्धा ये ग्रन्थाः सन्ति, तेषां समुचितपठन-पाठन-निदिध्यासन-विवेचन-विवरणादिषु संस्कृतभाषायाः प्रगल्भज्ञानेन संस्कृतिः धर्मश्च सम्यग्तया समनुज्ञायते, समनुभूयते, जीवितं च तेन संस्कृतं सधर्मसदाचारं भवेदेव, यस्मात् संस्कृतज्ञस्य विदुषां चाङ्ग्लादिभाषाविदाम् विचारोच्चाराऽऽचाराणाम् तारतम्यं मतिगम्यं भवत्येव। संस्कृतभाषायाः अध्ययनमभ्यासो यथा यथा वर्धते, तथा तथा जीवने संजीवनायन्ते सद्विचाराः संस्कृतिश्चान्याः विकृतीरपाकृत्य संवर्धते। धर्मं चापि वर्धयति। प्राक्तने च समयेऽस्माकं भारतवर्षे संस्कृत-प्राकृतभाषाऽभ्यासत एव संस्कृतिसमृद्धिरासीत्। जनाऽपि प्रकृतिं निसर्गं पर्यावरणं सामीप्येनानुभवन्ति स्म। संस्कृताऽभ्यासे शिथिलतया हि भारतं वर्षं ज्ञानभा-रतं यदासीत् तदधुना विकृति-झंझावातप्रहारशतजर्जरितं विहितमस्ति अत एव विचारस्य आदर्शीभूता भाषा तस्मात् संस्कृति संवर्धनशीला, संस्कृते मूलभूता संस्कृतभाषा हि प्राधान्यमर्हति, तस्याश्चाऽध्ययनेनाऽभ्यासेन निरन्तर लेखन-पठन-पाठनादिना संवर्धयन्तु तामस्माकं जीवने सदाचार-सद्धर्मसंवर्धिनीं संस्कृतां भाषाम्...इति शम्।

गणिश्रीधर्मतिलकविजयाः

# सद्गुरुवन्दना

यथाकाशे सूर्याचन्द्रमसौ प्रकाशयतस्तथा जिनेश्वरदेवा अपि समस्तजगत्यनेकानेकात्मनामात्मस्वरुपावबोधं कुर्वन्तितराम् सवितृशशिनौ प्रकाशनशीलौ तथापि भूमिगृहस्थितपदार्थानां नावबोधकौ, वीतरागाः केवलिनः श्रीजिनेश्वरास्तु त्रिभुवनस्थितपदार्थसार्थान् प्रकटीकुर्वन्त्यतो जिनेश्वरा अद्वितीयज्ञानभानवस्सन्ति ।

तै र्भगवद्भिस्संस्थापितं साम्राज्यं सुव्यवस्थिततया रक्षन्ति पूज्यपादाचार्यभगवन्त, एवं अनन्तोपकारिचरमतीर्थपतिश्रमणभगवच्छ्रीमन्महावीरप्रभूणां शासने सुविहितसूरिदेवा नैकशोऽभूवन्-भूतकाले, वर्तमाने नैकास्सन्ति, कालेऽनागते नैका भविष्यन्ति। तेषूत्कृष्टप्रभाववन्तो युगप्रधानाः सूरिववराश्चतुरधिकद्विसहस्रा भविष्यन्ति, यतः-

"सुहम्माई दुप्पसहन्ता तेवीसुदएहिं चउजुआ दुसहस्सअ
जुगपवरगुरुतस्सम-इगारलक्खसहससोल ।।३३।।
एगावयारि सुचरणा, समयविऊ पभावगा य जुगवरा
पावयणिआइ दुतिगाई, वरगुणा जुगप्पहाण समा।।३४।।"

इति कालसप्ततिकावचनानुसारेण पञ्चमारके चतुरधिकद्विसहस्रा युगप्रधाना स्तथैवैकादशलक्षा षोडशसहस्राश्चाचार्यभगवन्तोऽपि प्रावचनिकादिगुणगरिष्ठा भाविन एव ।

एतादृशाचार्यप्रवरैरेव शासनोन्नतिः स्यात्, तीर्थंकरविरहकाले शासनप्रभावना कारणपूर्वकं भव्यजन्तवः कदापि दृष्टिरागिणो न संजायन्ते आराधकभावं च सदा हृदये समादधति तदर्थं दृढमनोबलवतां पञ्चाचारनिरतानां सूरिशेखराणां मार्गदर्शन मतीवावाश्यकमिति एतादृग्गुणगरिष्ठाचार्यवर्येष्वेकतमाः, प्रभावकता-प्रावचनिकतादिगुणसमृद्धाः, "संसारोऽयं खलु असार' इति ध्रुवपङ्क्ति-प्रवचनशैली धारकाः, त्याज्योऽयं संसारः, 'प्राप्तव्य एकमात्र मोक्षः', तदर्थं ग्राह्या दीक्षेति त्रिपदीदातारः श्रीमन्तो **विजयरामचन्द्रसूरि**शेखरा आसन्।

तैः स्पष्टवक्तृत्व-निर्भयता-दृढमनोबलित्वादिगुणैर्जनलज्जां दाक्षिण्यतां च विहाय मार्गरक्षणसत्यप्ररुपणादिद्वारा शासनरक्षा कृता, मोक्षैकलक्षिदेशनाद्वारा नैके भव्यजीवा मोक्षमार्गे स्थिरीकृताः, तस्मात्तेषां गुरुवराणां चरणकमलेऽस्माकम् शतशो भूरि भूरि च वन्दना ।

मुनिश्रीआत्मदर्शनविजयाः

# ''श्राद्धदिनकृत्य''-ग्रंथरत्नस्य परिचयपत्रम्

आसन्नोपकारिश्रीवीरविभोः पट्टे चतुश्चत्वारिंशत्तमे, आजीवन-कृताऽऽचाम्लतपःप्रभावित-**मेदपाट** (मेवाड) मण्डलनृप-**जैत्रसिंह**प्रदत्तेन 'तपा'-बिरुदेन 'तपागच्छ'प्रवर्तकाः **श्रीजगच्चन्द्रसूरयो**ऽभवन्। तैः साधुसमुदाये प्रविष्ट-शिथिलाचारसम्मार्जनार्थं क्रियोद्धारो विहितः। **मेदपाटे** आघाटनगरे द्वात्रिंशद्दिगम्बर-वादि-विजयेन नृप**तेजसिंह**प्रदत्त-'हिरला'-बिरुदधारिणामऽस्मिन् महति कार्ये सहायकाः तेषां शिष्याः पञ्चाशत्तमं वीरपट्टं प्रद्योतमानाः संविग्न-गीतार्थाः चारित्रनिष्ठाः शासनप्रभावका आचार्यश्रीदेवेन्द्र-सूरयोऽभवम्। तैरयं श्राद्धदिनकृत्यग्रन्थो जग्रन्थे।

शासनदेवतार्पितविशिष्टग्रन्थरचनासिद्ध्या तैः पूज्यैरनेकानेकग्रन्थरत्नानि वृतयश्च विरचितानि सन्ति। तेषु केचित्त्विमानि-

चान्द्रकुलबृहद्गच्छीयशान्तिसूरिप्रणीतधर्मरत्नप्रकरणस्य टीका, सुदंसणा-चरियं, चैत्यवन्दनादिभाष्यत्रयं, स्वोपज्ञवृत्त्युपेता-सिद्धपञ्चाशिका, श्राद्धदिनकृत्यं, श्राद्धप्रतिक्रमण-'वंदित्तु' सूत्रोपरिवन्दारुपद्यादिमाद्यशब्देन 'वन्दारु' -इति प्रख्याता वृत्तिः, पञ्च नव्यकर्मग्रन्थाः, षष्ठमर्कग्रन्थटीका प्रमुखानि।

स्वगुरुभिस्ते वैक्रमीयेऽक्षाऽनीकाऽक्ष्यऽङ्गुष्ठतमे (१२८५) संवत्सरे श्रीजैन-शासनसन्मान्ये तृतीये पदे प्रतिष्ठिताः ।

अथैकदा स्तम्भनकपुरे षड्दर्शनशास्त्रनिपुणैः संवेगनिर्वेदजननी-देशनालब्धियुतैस्तैः श्री कुमारपालविहारपौषधशालायां चतुर्वेदोपरि प्रवचनं दत्तम्। तदा तदाऽऽकर्णयितुं समागतेन श्रीवस्तुपालमंत्रीश्वरेण सामायिकस्थानामऽष्टादश-शतश्राद्धश्रोतॄणां मुखपोत्तिकाप्रभावनया सङ्घभक्तिः कृता।

तैः स्वपट्टेऽद्वितीयप्रतिभासंपद्-द्वितीयशिष्यरत्नाः पेथडशा-मंत्रीश्वरगुरवः सङ्घाचारवृत्तिप्रमुखविशिष्टग्रन्थकर्तारो भवभीरवः श्री धर्मघोषसूरयः स्थापिताः ।

वैक्रमीये चाऽगाऽङ्घ्र्यऽग्न्यऽजतमे (१३२७) वर्षे मालवाजनपदे सत्यपुरनगरे ते स्वर्गं जग्मुः। तद्विरहखिन्नः खंभातनगरनिवासी श्रावकभीमदेवोऽपरनामा। सङ्ग्रामसोनी द्वादशवर्षाणि यावदऽन्नभोजनमऽत्यजत्।

अयं ग्रन्थः श्रमणोपासकानामऽतीवोपयोगी वर्तते। याकिनीमहत्तरासूनु-श्रीहरिभद्रसूरिभिः श्रावकधर्मविधिप्रकरण-विंशतिर्विंशिकादिग्रन्थेषु निर्दिष्टानि यानि सद्गृहस्थस्याऽहोरात्रावावश्यककृत्यानि सन्ति तान्यऽष्टाविंशतिसङ्ख्याकानि ग्रन्थेऽस्मिन् विवृत्तानि सन्ति। तेषां कृत्यानां द्वारस्वरूपं यत्किञ्चिद् वर्ण्यते।

यथा:-

(१) नमस्कारद्वारे : नमस्कारमहामन्त्रस्य पठनविधिः, माहात्म्यं फलं च प्रदर्शितम्।

(२) स्मरणद्वारे : पञ्चपरमेष्ठिमहामन्त्रस्याऽर्थकथनम् ।

(३) व्रतद्वारे : श्रावकयोग्यानां व्रतानां भङ्गोपदर्शनम् ।

(४) योगद्वारे : तपोविषयकं चिन्तनम् ।

(५) चैत्यवन्दनद्वारे : श्रावकाणां स्नानविधिः, गृहमन्दिरे जिनबिम्बपूजाविधिः, पूजाफलं, भावपूजा तथा चैत्यवंदनविधिकथनम्।

(६) प्रत्याख्यानद्वारे : देवसाक्षिकं प्रत्याख्यानग्रहणम्।

(७) चैत्यगृहगमनद्वारे : ऋद्धिसंपन्नश्राद्धस्य सङ्घजिनालये गमनविधिः, प्रभावना तत्कलानि च।

(८) सत्कारद्वारे : जिनमन्दिरप्रवेशे पञ्चाभिगमविधिः, नैषेधिकीप्रदक्षिणयो-र्भावना, गर्भगृहप्रवेशः, स्नपनविधिप्रपञ्चं,आरात्रिकावसरे च नाट्यविधानम्।

(९) वन्दनद्वारे : सामान्यश्राद्धस्य चैत्यगमनविधि-र्वन्दनविधि-र्वन्दनाफलं षण्णां वन्दनजन्यगुणानां चोपवर्णनम्।

(१०) प्रत्याख्यानद्वारे : गुरुसाक्षिकं प्रत्याख्यानकरणम्।

(११) यतिपृच्छाद्वारे : गुरो-र्देहेऽव्याबाधवार्तादिपृच्छा ।

(१२) उचितकरणीयद्वारे: गुरोरौचित्यकरणस्य निर्देशः ।

(१३) श्रवणद्वारे : जिनवचनश्रवणविधिः, संशङ्कितार्थपृच्छा, तदर्थ-निश्चयस्योपदेशः, तीर्थोद्धारफलं चैत्यद्रव्यविनाशोपे-क्षणस्य च प्रदर्शनम्।

(१४) व्यवहारशुद्धिद्वारे : पञ्चदशकर्मादानवर्जनोपायोपदेशः व्यवहारे च शुद्ध्यऽभावे सर्वस्य श्रावकाचारस्य नैष्फल्यकथनम्।

(१५) भोजनद्वारे : भोजनवेलायां प्राप्तायां शुश्रावकस्य गृहमन्दिरे जिनबिम्बपूजनवन्दनविधापनम्, रसवत्यां सिद्धायां साधुनिमन्त्रणविधिः, सुपात्रदानयत्नफलं, वसतिदान-महिमा, साधर्मिकवात्सल्यस्य कर्तव्यतयोपदेशोऽनु-कम्पादानस्याऽनिवारितत्त्वकथनमित्यादि बहुवक्तव्यम्।

(१६) संवरणद्वारे : विधिपूर्वकस्वाध्यायः कर्तव्यः।

(१७) श्रवणद्वारे : आगमश्रवणफलस्योत्सर्गविधेः सचित्तपरिहारब्रह्मचर्यैक-भक्तादेः प्रकटनम् निशाभोजिनां चाऽपायप्रदर्शनम्।

(१८) सत्कारद्वारे : सन्ध्यासमये पूजाविधापनम्।

(१९) आवश्यकद्वारे : प्रदोषे प्रतिश्रये गत्वा यथाविधि कृतसामायिकः श्राद्धः प्रतिक्रमणवेलायामाऽऽवश्यकं कुर्यात्।

(२०) यतिविश्रामणाद्वारे : आवश्यकस्वाध्यायकरणपूर्वकं गुरोरग्रे सूत्रार्थपृच्छा।

(२१) उचितयोगद्वारे : साधूनां विश्रामणां विधाय शेषकृत्यपृच्छा।

(२२) परिवारदेशनाद्वारे : प्रतिश्रयात् गृहे समागत्य श्रावकस्य द्रव्यतो भावतश्च भार्यादीनां चिन्तनावश्यकता, धर्मदेशना-विधिः, अणुव्रतोपदेशः स्वजनानां चैवं धर्मे स्थिरीकरणार्थं मनुष्यत्वादिसामग्रीणां दुर्लभता प्रस्तावना।

(२३) विधिशयनद्वारे : सर्वजीवक्षामणा, जिनसमक्षं क्षमाऽऽलोचना सर्वपापपरिहारार्थकथनं च।

(२४) अब्रह्मत्यागद्वारे : श्रावकेण प्रायः ब्रह्मचर्यवता भाव्यं तदर्थं च मोहजुगुप्सा गृहवासस्य निन्दा मुनिमार्गप्रव्रजने च भावना।

(२५) स्त्रीशरीरस्वरूपचिन्तनद्वारे : योषिदऽङ्गतत्वभावनं युवतिपञ्जरबद्धपुरुषाणां च क्लेशस्यैव प्राप्तिरितिभावनश्च।

(२६) स्त्रीसङ्गनिवृत्तबहुमानद्वारे : स्त्रीभोगविरतेष्वाऽऽन्तरप्रीतिप्रदर्शनं परमेष्ठि-भगवन्तं च चित्ते स्थापयित्वा ब्रह्मचर्यपूर्वकं निद्रासेवनम्।

(२७) बाधकदोषविपक्षचिन्तनद्वारे : संसारस्य दुःखरुपत्व-दुःखफलवत्त्व-दुःखानुबन्धित्त्वचिन्तनं तद्धेतूनां निराकरणं मोक्षस्य च स्मरणार्थमुपदेशः।

(२८) धर्माचार्यस्मरणद्वारे : सूरिगुणानां निर्देशः, मूलगुणकथनपूर्वकं सर्वगुणार्थमुपदेशः, सूरिपददुर्लभत्त्वप्रतिपादन-मुत्तमश्रावकस्य चोत्तममनोरथविभावनमिति।

ईदृशाणि शिवप्रासादसोपानपङ्क्तय इवाऽमूनि द्वाराणि सम्यग् विज्ञाय सम्यग् परिज्ञाय सम्यगाऽऽराध्य भव्याः दुर्लभं प्राप्तं निजं मनुष्यत्वं सफलीकृत्य **निःश्रेयसं** पदं चप्राप्नुयुः तदर्थमऽयं प्रयासः।

सा.श्रीप्रशमनिधिश्री

# अनूदितानि चैत्यवंदनस्तवनानि

## (१)

## सामान्यजिनचैत्यवन्दनम्

तुज मुरतिने निरखवा, मुज नयणा तरसे,
तुज गुण गणने बोलवा, रसना मुज हरसे,
काया अति आनंद तुज, युग पद फरसे,
तो सेवक तार्या विना कहो किम हवे सरसे,
अेम जाणी ने साहिबा, अे नेक नजर मोही जोय,
**ज्ञानविमल** सु नजर थी, ते शुं जे नवि होय.

## सामान्यजिनस्तवनम्

## (१)

तुं प्रभु मारो, हुं प्रभु तारो, क्षण एक मुजने नाहिं विसारो,
महेर करी मुज विनंती स्वीकारो, स्वामी सेवक जाणी निहाळो... १
लाख चोराशी भटकी प्रभुजी, आव्यो छुं ताहरे शरणे हो जिनजी,
दुर्गति कापो शिवसुख आपो, भक्त सेवकने निज पद स्थापो... २
अक्षय खजानो प्रभु तारो भर्यो छे, आपो कृपाळु में हाथ धर्यो छे,
वामानंदन जगवंदन प्यारो, देव अनेरा मांहि तुं न्यारो... ३
पलपल समरुं नाथ शंखेश्वर, समरथ तारण तुं ही जिनेश्वर,
प्राण थकी तुं अधिको व्हालो, दया करी मुजने नेहे निहाळो... ४
भक्त वत्सल तारुं बिरुद जाणी, केड न छोडुं अेम लेजो जाणी,
चरणोनी सेवा नितनित चाहुं, घडी घडी मनमांहि उमाहुं... ५
**ज्ञानविमल** तुज भक्ति प्रभावे, भवोभवना संताप शमावे,
अमीय भरेली ताहरी मूरति निहाळी, पाप अंतरना देजो पखाळी... ६

### (सामान्यजिनचैत्यवन्दनस्यानुवादः)

(अनुष्टप्)

नेत्रे समुल्लसेते मे, प्रतिमां ते निरीक्षितुम् ।
वर्णयन्ती गुणौघं ते, जिह्वा मम प्रमोदते ॥१॥
त्वत्पादपद्मसंस्पर्शान्मनोलि र्मम प्रीयते ।
निर्वाहो न भवेदेवं, दास-निस्तारणं विना ॥२॥
ज्ञात्वैवं त्रिजगन्नाथ!, प्रीत्या प्रेक्षस्व मां प्रभो! ।
**ज्ञाननिर्मलया** दृष्ट्या, किं तद् यन्न भविष्यति ॥३॥

### (सामान्यजिनस्तवनस्यनुवादः)

ममाऽसि देव! त्वमहं तवाऽस्मि, विस्मारणीयोऽस्मि कदापि नैव ।
कृपां कुरु त्वं श्रुणु याचनां मे, मां सेवकत्वेन निभालय त्वम् ॥१॥ (उपजाति)

तवाऽऽगतोऽयं शरणेऽस्ति भक्तो, भ्रान्त्वा समग्रे खलु योनिदेशे ।
दौर्गत्यमात्मीयतया निवार्य, मां स्थापयार्हन्नथ मोक्षराज्ये ॥२॥

देव! त्वदीयोऽक्षयवैभवोऽस्ति, देहि प्रभो! मां, प्रसृतौ करौ स्तः ।
विधाय कृपां मयि प्राणप्रष्ठ !, प्रीत्या निरीक्षस्व समर्थत्रातः ! ॥४॥

त्वं वत्सलो देव! समाश्रितानां, श्रुत्वाऽथ जानीहि जहामि नैव।
त्वत्संनिधानं क्रमसेवनां ते, देहि प्रभो यां सततं समीहे ॥५॥

पीयूषपूर्णा प्रतिमा त्वदीया, मथ्नाति दृष्टा मम कल्मषाणि ।
भक्तिप्रभावात्तव देव! बालः, दूरीकरोतु प्रतिजन्मतापम् ॥६॥

## (३)

## श्री अजितजिनस्तवनम्

शुभ वेला शुभ अवसरे रे, लाग्यो प्रभु शुं नेह,
वाधे मुज मन वालहो रे, दिन दिन बमणो तेह,
अजितजिन विनतडी अवधार, मन मारुं लागी रह्युं रे, तुज चरणे एकतार...१
हैडुं मुज हेजालउं रे, करे उमाहो अपार,
घडी घडीने अंतरे, चाहे तुज देदार...२
मीठो अमृतनी परे रे, साहेब ताहरो संग,
नयने नयन मिलावतां रे, शीतल थाये अंग...३
अवश्यपणे एक घडी रे, जाये तुम विण जेह,
वरसा सो सम साहिबा रे, लागे मुज मन तेह...४
तुजने तो मुज उपरे रे, महेर न आवे कांई,
तो पण मुज मन लालचुं रे, क्षण अलगुं नवि थाय...५
आसंगायत आपणो रे, जाणीने जिनराज,
दरिशन दीजे दिन प्रति रे, **हंसरतन** सुख थाय...६

## (श्री अजितजिनस्तवनस्यानुवादः)

कल्ये काले सुभगसमये योजिताऽऽत्मीयतेयं।
भव्यत्रात! र्मम प्रतिदिनं वर्धते मानसे सा।
प्राणस्वामिन् निजमनसि भो! धारयेत्यर्थयामि।
हृद्भृङ्गोऽयं चरणकमले स्थापितोऽस्ति त्वदीये ।।१।। (मन्दाक्रान्ता)

नित्यं स्वान्तं गुणगणनिधे! दर्शनं तावकीनं ।
त्रैलोक्येश! स्पृहयति मम स्नेहलं किं करोमि? ।
पीयूषाभं लगति हृदये संन्निधानं त्वदीयं।
त्वन्नेत्राभ्यां नयनमिलिते शाम्यति मानसं मे ।।२।। (मन्दाक्रान्ता)

अब्दाभोऽयं तव विरहितो निश्चयेन क्षणैकः ।
निःस्नेहोऽसि प्रशमप्रिय रे! किं कृपा नो मयि ते।
लिप्सुश्चेतस्त्यजति न लवं त्वां तथापि प्रभो! मे।
देहि मह्यं तव प्रतिदिनं, **दर्शनं** स्वाश्रिताय ।।३।।(मन्दाक्रान्ता)

सा.श्री कुलरत्नाश्री

# श्रेयस्करी दीक्षा

मानवभवो दीक्षाकृतयेवाऽस्ति । किन्तु दीक्षा काऽस्ति?
दीक्षाया अर्थ: किमु ?

* जगतो जीवमात्रेण सह भौतिकसंबंधस्य त्याग:,
  जीवमात्रेण च सह चात्मिकसंबंधस्य बंधनम् इति दीक्षा ।
  **दी**यते जीवमात्रेण आध्यात्मिकसम्बधो यत्र ।
  **क्षी**यते जीवमात्रेण भौतिक: सम्बन्ध इति = दी+क्षा = दीक्षा
* समस्तसामाजिककर्तव्यस्य त्याग, आध्यात्मिककर्तव्यस्य च स्वीकृति: इति दीक्षा।
* कस्य त्याग: इति दीक्षा? कस्य स्वीकार: इति दीक्षा?-
  अत्र कथयति-दीक्षार्थी दीक्षाग्रहणस्यावसरे-यथा संपूर्ण: पापसाधनानां त्याग:, केवलं चाराधनासाधनानां स्वीकारं करोति।
* श्रेयोदानादशिवक्षपणात् या भवति सा दीक्षा।
* स्वस्य पार्श्वे योऽस्ति, स सर्व देवगुरुधर्मे समर्पित: स्यात् इति दीक्षा ।
* संपूर्णजगदभयदानार्पणस्य संकल्पस्तस्य नाम दीक्षा ।
* योऽधर्माणां निमित्ताऽऽलम्बनानां च सर्वथा त्याग: सा दीक्षा ।
* यो धर्माणां निमित्ताऽऽलम्बनानां च सर्वथा स्वीकार: सा दीक्षा ।
* त्यागस्समर्पणश्च इति दीक्षा ।
* असङ्ख्यजन्मजातानां पातकानां प्रायश्चित्तं इति दीक्षा ।
* पापानां प्रलयस्थानम् इति दीक्षा ।
* मोहस्य शिक्षा-दण्ड इति दीक्षा ।
* सुखस्य महोदधि: इति दीक्षा ।
* वैराग्यस्य समीक्षा इति दीक्षा ।
* भवतापात् तप्तजीवेषु शीतलछायाकर: प्रभाव:, सुखसंपत्तेरनुपमानुभव:, जिनाज्ञायाश्च श्रेष्ठपालनं, इति दीक्षा।
* जीवने यतना, वृत्तौ वैराग्यं, प्रवृत्तौ परोपकार इति दीक्षा ।
* ईदृशीं दीक्षां विधातु: मम गुरुदेवानां दीक्षायुगप्रवर्तकानां सूरिरामचन्द्राणां दीक्षाशताब्दी सर्वजीवानां मङ्गलं कुरु इत्यसावेका **श्रेय:**कामना ।

डॉ. सुरेशकुमार टी. व्यास

# शास्त्रसंरक्षणम् एवं संस्कृतभाषाविकासः

व्यासः सुरेशोऽहं विषयेऽस्मिन् मे मौलिकान् विचारान् प्रस्तौमि।

"द्वयमिह परिरक्ष्यं संस्कृतं संस्कृतिश्च" इत्यस्मत्पूर्वजोक्तिर्वर्तते। सा तदैव सफलीभविष्यति, यदा पूर्वोक्तविषये चिन्तनं मननं च कुर्मः।

(१) **शास्त्रसंरक्षणं कर्तव्यं,** तर्हि ये केचनांऽशा अस्माभिः समाजे प्रकाशनीयाः सन्ति-ते इमाः

१.१) शास्त्राणि कानि? किञ्च तेषां माहात्म्यम्?, तच्च किमर्थम्?

१.२) शास्त्रेण समाजस्य को लाभः?

१.३) शास्त्रं प्राचीनमेव भवति उत नव्यमपि?

१.४) शास्त्राध्ययनं कथं कर्तव्यम्?

१.५) संरक्षणं नाम किम्?

१.६) संरक्षणं कथं कर्तव्यम्?

१.७) संरक्षणस्य के सन्त्युपायाः?

१.८) संरक्षणस्य कानि सन्ति साधनानि?

१.९) नूतनग्रन्थनिर्माणम्।

**१.१) शास्तीति शास्त्रं इति।**

शास्त्रव्याख्या नाम इहलोकपरलोकसुखसाधकं शास्त्रम्। शास्त्रमाहात्म्यं किं?

इत्यत्रोच्यते-शास्त्रेणैव मानवो 'मानवो' भवति, तदभावे मानवो दानवो भवति। तच्च शास्त्रं सुविहितजीवितं कथं जीव्यते तदर्थं भवति।

**१.२) शास्त्रेण समाजस्य को लाभः?**

साक्षात् समाजसम्बन्धं विना कदापि विकासो न संभवति। अत

समाजस्य? समाजेनैव शास्त्रं समजनि तेन शास्त्रेण किं समाजः सञ्जन्यते? पाल्यते न वा? इत्यादिकमपि विचारणीयमस्माभिः।

षोडशसंस्काराः, मनोविज्ञानम्, आयुर्वेदशास्त्रम्, वैमानिकशास्त्रम्, सङ्गीतम्, ज्योतिषम्, गोविज्ञानम्, शास्त्रेषु निहितं ध्वनिविज्ञानम् इत्यादि शास्त्राणामस्ति साक्षात् संबन्धः समाजेन सह, अतः एतानि सरसया सुबोधया रीत्या संस्कृतज्ञाः प्रचारयेरञ्च प्रसारयेन्ञ्च, तदा समाजो लाभान्वितः कृतकृत्यश्च भवति, तेन च तस्य शास्त्रेषु निष्ठा, गरिष्ठा भावनाऽपि भवति।

### १.३) शास्त्रं प्राचीनमेव भवति उत नव्यमपि?

शास्त्रस्य शासकत्वात् उभयमपि प्राचिनाऽर्वाचीनं भवति। यथाऽऽधुनिकाः प्राचीनाः वा वैज्ञानिकाः अनुसन्धानकर्त्तारः ग्रन्थसंशुद्धिविधातारो महर्षिपदवाच्याः भवन्ति। तथैव यदुपदेशपरं हितकरं मधुरं इहपरलोकसाधकं तत् शास्त्रं भवति, भवतु नाम तत् प्राचीनमर्वाचीनं वा। अत्र मतभेदाः सर्वथा हेयाः।

### १.४) शास्त्राध्ययनं कथं कर्तव्यम्?

शास्त्रध्ययनस्य द्वे पद्धती प्रथिते-प्राचीनार्वाचीनेति। तत्र प्राचीनपद्धतौ स्मरण-पूर्वकं भानाप्तिर्भवति, आधुनिकपद्धतौ च नैके नूतनाविष्काराः जाताः, जायमानाश्चसन्ति। अस्माभिरत्र का पद्धतिः समाश्रयणीया, तत्राहं समादधे-यत् उभे पद्धती, अत्र स्मरणमपि नितान्तमावश्यकं तेन सह सङ्गणक-ध्वनियन्त्र-चित्र-कोष्टकादि नूतना पद्धतिरपि समाश्रयणीया। तेन दृढमूलं शाखाफलविस्तरं ज्ञानमपि भवेदिति मे मनीषा।

### १.५) संरक्षणं नाम किम्?

सम्यग् रक्षणं नाम संरक्षणं, परं तस्य जीवन्तता आवश्यकी, यथा सैनिकैः सीमस्थितैः देशः संरक्ष्यते, तेन च देशः जीवन् विकासपथमाश्रयते, तथैव शास्त्राणां पेटिकासु संरक्षणं भवेत् तत्तु शोभनं, परं तेन सहैव जनमस्तकेषु अपि शास्त्रं

जीवद्भवेत्तदैव तस्य संरक्षणं सुरक्षणं सफलं च भविष्यति।

## १.७) संरक्षणं कथं कर्तव्यम् ?

भारते विविधलिपिबद्धा लक्षाधिकाः पाण्डुलिपयः सन्ति। तासां पुनरुद्धारः कर्तव्यः। ताः पुनः लेखापयितव्याः तत्संरक्षणं च वैज्ञानिकपद्धत्या आयुर्वेदौषध्यादिभिः प्राचीनपद्धत्यापि कर्तुं शक्यते।

एतदर्थं प्रत्यक्षं कोबाजैनमन्दिरे श्रुतरक्षा इत्यन्यत्र,कर्णावतीस्थसंस्थयोः प्रत्यक्षं छात्राणां विदुषाञ्च दिग्दर्शनं कारणीयं स्वयञ्च कर्त्तव्यम्।

एतेषु ग्रन्थेषु पुनः लभ्यमाणेष्वेव भारतं भा-रतं भविष्यकालेऽपि भविष्यति-इति भाति मे।

## १.८) संरक्षणस्य के सन्त्युपायाः ?

शास्त्रसंरक्षणाय सर्वेऽपि जगद्गुरवः, मठाधीशाः, सम्प्रदायाः, सर्वकाराश्च प्रयतेरन् इत्यस्त्येकोपायः। नाम ते सर्वे एकैकं संस्कृत विद्यालयं, महाविद्यालयं, शोधकेन्द्रम् इत्यादिप्रकल्पान् संस्थापयेयुः, सञ्चालयेयुश्च। तदा संस्कृतसंरक्षणम-वश्यंभावीति मे दृढीयान् विश्वासः।

अपरमस्ति संस्कृतच्छात्रोत्साहवर्द्धनम्, तेन ते छात्राः शास्त्रेषु विश्वस्ताः भूत्वा महत्तरं योगदानं दधुः, संरक्षणं कर्तुं बद्धादराः समर्पिताश्च जायेरन्।

अधिकाधिकवेदविद्यालय-शास्त्रीयविद्यालयस्थापना तत्र छात्राणामध्यापनं तेन संख्यावृद्धिः, तया च सङ्घसिद्धिः, तया च शास्त्रसंरक्षणमिति।

## १.८) संरक्षणस्य कानि सन्ति साधनानि ?

मूलतः संरक्षणस्य साधनेषु प्रथमं साधनं भवति छात्रः, तत्र यदि स साधनभूतः छात्रः सोत्साही क्रियते, सरसः क्रियते, तदा मूलज्ञानान्वितो भवति, तर्हि स प्रमुखं सुदृढं सुस्थिरं च साधनं भवति।

ततः अध्यापनप्रक्रिया, तत्र यथा प्राचीनप्रणाल्या सह गुरवो नूतनाविष्कारानपि संयोजयेयुः, तदा तदपि उत्तमं साधनं भवितुमर्हति। तत्र ध्वनियन्त्राणां प्रयोगादिकर्मणि कर्तुं शक्यते, तेन च मध्ये छात्राणां मनोवैज्ञानिकदृष्ट्या मनोविकासः नैरस्यतानिरासश्च जायेत। एवमेव इन्टरनेटद्वारा विविधप्रान्तीयविदुषां सान्द्रमुद्रिकाः, वेदाद्यध्ययनम्, दृश्यश्रव्यमाध्यमम् इत्याद्याः विविधाः सामग्र्यः प्राप्यन्ते, तासामपि साधनत्वेन उपयोगः भवितुमर्हन्ति।

**संरक्षणं कैः कर्तव्यम्?**-शास्त्रसंरक्षणं शास्त्रज्ञैरेव कर्तुं शक्यते इति सार्वजनीनोऽनुभवः वर्तते। **यः यस्य ज्ञाता, स एव तत्र प्रयतेत** इति सामान्यः सर्वसाधारणश्च सिद्धान्तः सोऽत्रापि संप्रवर्तेत।

शास्त्रज्ञैः श्रेष्ठिभिः सर्वैः राजनायकैः सम्प्रदायस्थितैः बुद्धैः कर्तव्यं शास्त्ररक्षणम्।

**१.९) नूतनशास्त्र संरचना।**

ॐकारवेदोपनिषदारण्यक-ब्राह्मणदर्शन-पुराण-काव्य-कथासाहित्यानि क्रमबद्धानि पुरा क्रमविकसितानि च दृश्यन्ते, तत्र वर्तमाने तु समये परस्परं मति-शैथिल्यात् कालवैकल्यात् वा विकासः कर्तव्यो दृश्यते।

इत्थं कालानुरोधेन साम्प्रतं नूतन-सरल-सरस-शास्त्रसंरचना सञ्जायेत तर्हि मूल-प्राचीन शास्त्रसंरक्षणे महदुपकृतं भवेत्।

(२) **अत्र अपरोंऽशः "संस्कृतभाषा-विकास"** इत्यस्ति। अत्र किं नाम संस्कृतम्? का नाम भाषा? कथं चैतां साधयितुं शक्येत इति विचारांशाः चिन्तनीयाः सन्ति। "संस्कृतं नाम दैवी वाग् अन्वाख्याता महर्षिभिः" इत्यादिभिर्वाक्यैः संस्कृतं देववागिति सिद्धमेव। भाषा नाम हृदयभावनसम्प्रेषणासाधनं माध्यमं वा। अस्मिँश्च विषये पर्याप्तावकाशमवलम्ब्य पर्यालोचन कार्यमधुना प्रवर्त्तते, अत आगामिनि समयेहं सुविस्तृतया संस्कृतभाषाया विकासः कथं कार्य इति चर्चयिष्यामि।

ACHARYA SRI KAILASSAGARSURI GYANMANDIR
SRI MAHAVIR JAIN ARADHANA KENDRA
Koba, Gandhinagar 382009
Phone: (079) 23276252, 23276204-05




प्रकाशकम्
जगद्गुरु पू.आ.श्री
विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्
पालडी-अहमदाबाद

Matiksha
M.: 9820715236